Digitization by Arya Samaj Charitable Foundation, Chennai

वै

वेदजयश्रीः

by

भट्ट वेणीदत्ताचार्य

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

THE

PRINCESS OF WALES

SARASWATĪ BHAVANA TEXTS

No. 47

—o—

EDITED BY

GOPĪ NĀTHA KAVIRAJA, M. A.

THE

BHEDA JAYAS'RĪ

BVB Sri Sanskrit Vidya Sanskrit Mahavidyalaya
217

Printed by Jai Krishna Das Gupta
Vidya Vilas Press, Benares City.

1933

BVBSSMV

Saleable at half of the printed price

Digitization by Arya Samaj Charitable Foundation, Chennai

...ratiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavi...

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

श्रीतर्कवागीशभट्ट वेणीदत्ताचार्यप्रणीता

भेदजयश्रीः

THE

BHEDAJAYAS'RĪ

By

S'rī Tarkav'āgīśa Bhaṭṭa Veṇidattāchārya

Edited with Introduction etc.

By

PT. TRIBHUVAN PRASAD UPADHYAYA, M. A.,
Inspector of Sanskrit Pathashalas,
United Provinces, Benares.

1933

Bhawan's Sri Sankaracharya Sanskrit
217

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

INTRODUCTION

The present edition of Bhedajaya s'rī is based on a single manuscript of the work belonging originally to the family collection of the author and now deposited in the Library of the Govt. Sanskrit College, Benares. The author whose name is Veṇī Datta and who describes himself as Tarka Vāgīśa, or Tarkadhurandhara Vāgīśa Bhaṭṭāchārya in the colophons of many of his works, was a descendant of Mahīdhara alias Mahīdāsa, the author of Mantramahodadhi, a commentary on the Charaṇa vyūha and a commentary on S'ukla Yajus Saṃhitā. Veṇīdatta's father Vīreśvara was the son of Lakṣmaṇa, the younger brother of Rāma and son of Kalyāṇa, the son of Mahīdhara. Veṇīdatta was a prolific writer and is known to have produced a large number of small tracts, mostly on subjects connected with Indian Philosophy.

His Padārtha Maṇḍana, which was a reply on behalf of the traditional Vais'eṣika System to Bhaṭṭāchārya Raghunātha S'iromani's Padārtha Khaṇḍaṇa alias Padārtha Tattva Nirūpaṇa (published in "The Pandit") has already appeared in the present series as No 30. The other works attributed to Veṇīdatta are named below:—

Digitization by Arya Samaj Charitable Foundation, Chennai

(a) Mukti Vimars'a.

(b) Parāmarśa Vimarśa.

(c) Tarkadhundha dhvaṃsana—(Sāmānya Lakṣaṇā Bhaṇga).

(d) Tarka Sāmānya Khaṇḍana (dated Sam. 1750).

(e) Vākyārtharatna prabhā (Saṃ 1772)

(f) Alaṅkārachandrodaya (in 6 Ullāsas).

(g) Nyāya Siddhānta Rakṣāmaṇi.

(h) Annapūrṇāṣṭaka.

(i) Kālikāṣṭaka.

The date of Veṇīdatta can be determined, on the data availaible to us, with more or less precision. (a) Mahīdhara lived from about 1556 A. D. to about 1595 A. D. There are three generations between him and the author of the present work. If 30 years are assumed for each generation there ought to be an interval of about 120 years between his date and that of Veṇīdatta.

(b) But more precise information on the date of Veṇīdatta is available. Mss. of Tarkadhundhadhvaṃsana and Parāmarśa vimars'a by Veṇīdatta and in his own hand writing which are in the Mahīdhara Collections of the Benares Sanskrit College Library bear the Saṃvat date 1750 or 1693 A. D.

(c) Veṇīdatta's son was one Bhaṭṭa Kṛṣṇa Datta, many of whose little works are to be found, some bearing

Digitization by Arya Samaj Charitable Foundation, Chennai

dates. A Ms. of Brahma Vaivarta Mahāpurāṇa (fols. 1–81), copied by Bhaṭṭa Kṛṣṇadatta in Saṃ. 1778 or 1721 A. D. is in the Sanskrit College Library. This also confirms the date of Veṇīdatta as in (a) and (b) above. A consideration of the above data leaves no doubt in the mind that Veṇīdatta was living in the last decade of the 17th Century.

(d) The author's references to **भामती, मणिकृत्, दीपिकाकृत्, आश्रम** etc., furnish external data for the above mentioned conclusion.

The nature of the present work which concerns itself with the rationalised dualism of the School of Madhvāchārya as against the unqualified monism of S'aṅkara's system is more or less polemical. Veṇīdatta lived at a time when the struggle for the self-assertion between the rival theories referred to above had become traditional and he inherited the bitterness associated with such struggles. It is of interest to observe that no system of Indian Philosophy evoked such universal and stout oppositions, often sustained through centuries, as the Advaita Vedānta attributed to S'aṅkara and Gauḍapāda, and no system showed such resourceful vitality and stamina enabling it to survive such attacks. There were several lines of monistic speculation in the history of Indian Philosophy, both ancient and mediaeval, but the position of S'aṅkarāchārya was

Digitization by Arya Samaj Charitable Foundation, Chennai

unique, not simply because it was the most universally assailed but also because it had the greatest amount of strength and life within it. The present tract had a number of predecessors in the field, the Nyāyāmṛta and the Nyāyāmṛtataraṅgiṇī belonging to the same school being the most brilliant of them all. The Bheda-ratna of S'aṅkara Mis'ra and the Bheda Siddhi of Vis'va-nātha are similar works of the Naiyāyikas. And there are numerous works of a like nature belonging to the other schools as well.

It is not possible, nor is it necessary, to attempt a synopsis of the different philosophic doctrines of the Madhva Sect within the brief compass of this short Introductory Note. All that need be said is that the system maintains well defined views regarding the difference of Jīva and Îs'vara, of one Jīva and another, of Îs'vara and Matter, of Jīva and Matter, and one form of Matter and another. It also emphasises that this difference is ultimate and persists through eternity. It is further asserted that Mokṣa or the final release of the soul which means its self-realisation consequent on the eradication of ignorance follows from Divine Grace (ईश्वर प्रसाद) which manifests itself through God-vision—which again is the effect of deep contem-plation—(निदिध्यासन, ध्यान, दृढभावना) preceded by medi-tation (मनन) on the teaching received direct from the master.

Digitization by Arya Samaj Charitable Foundation, Chennai

The contents of this work may be summed up as follows.

The author says that ब्रह्म, जीव and प्रधान are three things which should receive special consideration of those who are मुमुक्षु. He mentions साधनसम्पत्ति, ईश्वरभक्ति, गुरुप्रीति and पूर्णवैराग्य as important requisites for the study of Vedānta S'āstra in general. The aim of the S'āstra is Self-realisation consequent upon an elimination of ignorance in all its forms. The causal series of antecedents leading to Mukti, as recognised in this system, are:-(1) अधिकार, 2) श्रवण, (3) मनन, (4) निदिध्यासन or अध्ययन or विचार, (5) revelation of the Supreme Self (known as ज्ञान), (6) Divine Grace and then (7) मोक्ष.

This system lays special stress on भक्ति without which there can be no मुक्ति. Thus भक्ति (Divine Grace) has even a more important place than ज्ञान in this system.

The author then discusses the different kinds of प्रत्यक्ष. The Madhva view is that the immediate apprehension known as साक्षि प्रत्यक्ष is the best of all valid sources of knowledge and has for its object the eternal difference between जीव & ईश्वर as expressed in the judgment नाहमीश्वरः. It is not necessary, as in Sāṅkhya or Vedānta, that साक्षित्व should be absolutely unrelated with कर्तृत्व. The view that कूटस्थ चैतन्य which is the

Digitization by Arya Samaj Charitable Foundation, Chennai

substrate of the two bodies—physical and subtle—is साक्षि by virtue of its immutable character and direct awareness is controverted by the author (page 9). The view that जीव with अविद्या as its उपाधि is the real साक्षी is also refuted (page 10). In common with the monist school this system too admits three kinds of सत्ता viz. स्वरूप सत्ता, व्यावहारिक सत्ता and प्रातीतिक or प्रातिभासिक सत्ता (page 12).

The author then establishes the theory or principle of भेद in general (ending on page 17). He deals with भेद between ईश्वर and जीव (pages 16, 17 & 18). He proves that भेद has अधिकरण सत्ता (pages 19 & 20.

This system lays special stress on what is technically described as विशेष which accounts for difference in प्रतीति or व्यवहार even where there is no such difference in सत्ता. The Madhvas assert that even the Monists should be logically constrained to admit a a principle of differentiation of this nature. Otherwise it would be difficult for them to account for or justify the different synonyms which are employed in scriptures in the same context with reference to the Supreme Reality.

The system admits two अविद्या 's—the function of one being to conceal ईश्वर and His attributes from जीव, and that of the other being to obscure the infinite Self-delight of the जीव. The first अविद्या is removed by

Digitization by Arya Samaj Charitable Foundation, Chennai

the immediate perception of God or God–vision, while the second is removed by the great Divine Grace following from God-vision. It is for this reason that the Scriptures state विमुक्तश्च विमुच्यते which means that मुक्ति is two-fold on account of the two-fold nature of अविद्या which is removed.

Finally, the author establishes the five-fold distinction, the great topic of the Madhva School. In this connection he first puts forth the common experiences— नाहमीश्वरः, नाहं चैत्रः, घटो न ब्रह्म, घटो न पटः and नाहं घटः,

He further substantiates this doctrine by means of elaborate and detailed S'āstric arguments and finishes the book.

Before concluding this short introduction the editor wants to apologise to the readers for any slips and shortcomings which may have appeared in the following pages, in view of the fact that the edition had to be based on a single manuscript only and that the work is of a peculiarly polemic character.

T. P, Upadhyaya

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीगणेशाय नमः ।

भेदजयश्रीः

ॐ नमः परमानन्दवृन्दाविपिनवासिने ।
श्रीकृष्णाय प्रपूर्णाय कल्याणगुणशालिने ॥ १ ॥
अद्वैतयुक्तिपूतनामर्दनी जयवर्द्धनी ।
उद्धृतः मध्वदुग्धाब्धेर्जयश्रीर्विदुषां मुदे ॥ २ ॥
मुमुक्षुणा विशेषेण प्राप्यप्रापकभावतः ।
ब्रह्म जीवः प्रधानं च विवेच्या हि त्रयः सदा ॥ ३ ॥
शमदमादिसम्पन्नो माधवे भक्तिमान् नरः ।
इहामुत्र विरक्तोऽत्र ह्यधिकारी गुरुप्रियः ॥ ४ ॥

शान्तो दान्तस्तितिक्षुरुपरत आत्मन्येवात्मानं पश्येत् तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते परीक्ष्य कर्मचितांल्लोकान् ब्राह्मणो निर्वेदमायात् ।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैव कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इत्यादिश्रुतेः । अल्पगुणवत्त्वेनानुभूयमानाज्जीवाद्वस्तुतो भिन्नः सदनन्तगुणः परमेश्वरः शास्त्रस्य विषयः । निःशेषाविद्यानिवृत्तिपूर्वकस्वरूपाविर्भावरूपो मोक्षः प्रयोजनम् , वाच्यवाचकभावः सम्बन्धः, अधिकारानन्तरं गुरुमुखाद् वाक्यार्थग्रहणरूपं श्रवणम् , ततो युक्तिभिश्चिन्तनं मननम् , अथ विजातीयप्रत्ययानन्तरितसजा-

Digitization by Arya Samaj Charitable Foundation, Chennai

तीयप्रत्ययप्रवाहो ध्यानापरपर्यायो निदिध्यासनम्, ततो भगवदापरोक्ष्यम्, ततो भगवत्प्रसादः, अथमोक्षः, अतिभावनया विधुरस्य मृतभार्य्याया आपरोक्ष्यवत्, परोक्षस्वभावस्यापि भगवत आपरोक्ष्यं भवति ।

न चातिभावनाजन्यत्वेन ब्रह्मज्ञानस्य भ्रमत्वापत्तिः, भ्रमत्वे विषयबाधदोषजन्यत्वादेरेव प्रयोजकत्वेन भावनाजन्यत्वस्याप्रयोजकत्वात् । ईश्वरध्यानजन्यापरोक्ष्यविषयेश्वरस्य बाधाभावात् । न च दृष्ट्वैव तं मुच्यत इति ज्ञानादेव मुक्तिश्रवणात् किं मध्ये प्रसादेनेति वाच्यम्, शंखः पाण्डर एवेतिवत् एवकारेणायोगव्यवच्छेदबोधनात् । न च प्रसादस्य मोक्षहेतुत्वे मानाभावः, नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेनैव लभ्यः, यस्य प्रसादात् परमार्तिरूपात् संसारान् मुच्यते नापरेणेत्यादि–श्रुतेः । मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययमित्यादि–स्मृतेश्च मानत्वात्, मोक्षहेतुर्महाप्रसादश्च ज्ञानादेवः प्रियो हि ज्ञानिनो ऽत्यर्थमहं स च मम प्रिय इत्यादिस्मृतेः । नित्यस्यापीश्वरेच्छादिरूपस्य प्रसादस्य वेदान्तवासितमनोजन्यस्वयोग्याशेषभगवद्विशेषापरोक्षवृत्तिप्रागभावध्वंसवति जीवे सम्बन्धः, यथा द्वैतिनां वृत्तिश्चिदुपरागार्थेति मते व्यापकस्यापि चैतन्यस्य घटाद्याकारवृत्तिसम्बन्धे सम्बन्धो जायते नान्यत्र, यथा च तार्किकमते व्यापकस्यापि गोत्वादेः सास्नादिमत्येव सम्बन्धो नान्यत्र तद्वत् । वृत्तिप्रागभावध्वंसश्च वृत्तितद्ध्वंसान्यतररूपो ऽतो मोक्षहेतुरीश्वरप्रसादस्तद्धेतुरीशापरोक्ष्यं तद्धेतुर्विचारस्तदर्थं शास्त्रमारम्भणीयम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्र महान्तस्तु मोचकश्चेश्वरप्रसादस्तद्भक्त्यैव, भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येनेति वचनात्; प्रसादश्चेच्छाविशेषो गुणान्तरं वा न नः क्षतिः। न चास्तु तथा, तथापि जिज्ञासायाः क उपयोगो भक्तेर्ज्ञानघटितत्वात्, ईश्वरभक्तिर्नाम निरवधिकानन्तानवद्यकल्याणगुणत्वज्ञानपूर्वकमन्तरायसहस्रेणाप्यप्रतिबद्धो निरन्तरप्रेमप्रवाहः, तादृशज्ञानं श्रवणादिनैवेत्यावश्यकः शास्त्रारम्भ इति प्राहुः;

अद्वैतिनां तु शास्त्रारम्भो व्यर्थ एव, विषयप्रयोजनाद्यभावात्, यदुक्तं भामत्याम्, 'यद्यपि जीव एव ब्रह्म स चाहमिति ज्ञाने भासत एवेति सन्दिग्धत्वाभावान्न शास्त्रस्य विषयः, नाप्यविद्यानिवृत्तिः प्रयोजनम्, उक्तरीत्या ऽऽत्मनि ज्ञायमाने ऽपि तदनिवृत्तेः, तथापि वेदान्तवाक्यैर्ज्ञानानन्दैकरसाद्वितीयोदासीनभावमात्मतत्त्वमुपक्रमादिभिः प्रतिपाद्यते, प्रत्यक्षेण तु प्रादेशिकानेकविधशोकदुःखादिप्रपञ्चोपप्लुतं गृह्यते ऽत आरभ्यो विचारः, न च प्रत्यक्षविरोधादप्रामाण्यम्, श्रुतेः, प्रत्यक्षं हि सम्भावितदोषमपौरुषेयेण निर्दोषेणागमेन बाध्यते तेन वेदान्तवेद्यः शुद्धो नाहं प्रत्यये भातीति विषयादिसिद्धिरिति तन्न, निर्विशेषे भाताभातविभागस्यासम्भवात् अभासमानत्वेन देहात्मनोर्भेदस्य कर्तृत्वभोक्तृत्वाद्यभावस्य जीवब्रह्माभेदस्य द्वितीयमात्राभावस्य वा त्वदभिमतस्यात्मनो भिन्नत्वे सत्त्वे चाद्वैतहानिः, मृषात्वे तद्बोधकश्रुतेरप्रामाण्यापत्तेः, शरीरभेदादेः सत्यत्वापत्तेश्च; न चाभावो द्वितीयो मयाङ्गीक्रियते न भाव इति वाच्यम्, अभावत्वाधेयत्वाधारत्वादीनां भावानामपि सत्यत्वापत्तेः। सप्रतियोगिकस्याभावस्य भावापेक्षया ऽतिशयेनाद्वैतविरोधित्वाच्च ।

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वितीयमात्रनिषेधकस्याद्वितीयपदस्य भावनिषेधपरत्वसङ्कोचे स्वतन्त्रद्वैतनिषेधपरत्वेनैव सङ्कोचापत्तेः, अखण्डार्थेन वेदान्तेन ब्रह्माभावयोर्द्वयोरसिद्धेश्च । देहभेदादीनां भासमानात्माभिन्नत्वे ऽभानासम्भवात् । न च कल्पितभेदेनागृहीत इव भातीतिवाच्यम् तत्त्वतो गृह्यमाणे भेदकल्पनाया, अगृहीतत्वारोपस्य वा ऽसम्भवात् । न च द्वितीयाभावादिनोपलक्षित आत्मा शास्त्रवेद्यः स च सत्य इति वाच्यम्; स्वप्रकाशत्वेन नित्यसिद्धात्मावबोधार्थमुपलक्षणोक्त्ययोगात् । गृहे काकोत्थाप्योक्षृणत्वादिवत् । तदुत्थाप्यधर्मस्य ब्रह्मण्यसत्त्वेन धर्मान्तरमुत्थाप्य व्यावर्तकत्वरूपोपलक्षणत्वासम्भवाच्च । द्वितीयाभावाद्यधिकरणतया, अविद्याधिष्ठानतत्साक्षितया च भासमानचिदन्यस्योपलक्ष्यस्याभावेन द्वितीयाभावादेरुपलक्षणत्वायोगाच्च । स्वप्रकाशस्याप्यविद्यावशादभानाङ्गीकारे जगदान्ध्यापत्तेः । तमेवभान्तमनुभाति सर्वमित्यादि-श्रुतिं व्याकुर्वता त्वया जगद्भानस्य ब्रह्मप्रकाशात्मत्वाङ्गीकारात्, शुद्धस्यैव ब्रह्मणो व्यावहारिकप्रपञ्चाधिष्ठानत्वाङ्गीकारेण तद्भानं विना ऽध्यस्तस्य विश्वस्य भानायोगाच्च । न च स्वरूपचितः प्रकाशे ऽपि तस्या अज्ञानविरोधित्वाद्, विरोधिन्याश्च वृत्तेरभावेनाविद्यावृतत्वात् सन्दिग्धत्वमिति युक्तम्, स्वरूपचितो ज्ञानाविरोधित्वे तद्वेद्ये दुःखादावज्ञानप्रसङ्गात्, दुःखाद्याकारवृत्त्यङ्गीकारे चैतन्यस्य ज्ञानत्वे मानाभावापत्तेः सुखादेः क्षणमज्ञातत्वापत्तेश्च । न चाहम्प्रत्यये विशिष्टमेव भाति न शुद्धमिति वाच्यम्, विशिष्टभाने विशेष्यभानावश्यकत्वेनात्मनो ऽसन्दिग्धत्वेन विषयत्वासम्भवात् ।

यच्चोक्तं भामत्याम् । यथा षड्जादयो गान्धर्वशास्त्राभ्यासा प्राग्-

Digitization by Arya Samaj Charitable Foundation, Chennai

गविस्फुरन्तस्तद्रूपेणानुल्लिखिता न श्रोत्रेण व्यज्यन्ते । व्यज्यन्ते तु शास्त्रवासितेन तेन । एवं वेदान्तवाक्यजन्यब्रह्मैक्याकारवासितान्तःकरणेन तद्भावाभिव्यक्तिर्न प्रागिति, तन्न, प्रागस्फुरतः पश्चाच्च स्फुरतः षड्जत्वादिजातिविशेषस्येव प्रकृते तस्याभावात् । स्वरूपातिरिक्तधर्माभावेन तस्यास्फुरणे ऽधिष्टानज्ञानाभावाद् आरोपो न स्यात् । स्फुरणे आरोपायोगाच्च । न च तत्रावरणं विरोधि किन्तु वृत्तिरेवेति वाच्यम्, सर्वप्रत्ययवेद्यत्वेन घटादिज्ञानस्य चिज्ज्ञानत्वेनावरणासम्भवात् । कारणविशेषजन्यवृत्तिविशेषस्य तन्निवर्तकत्वस्वीकारे ऽदृष्टविधया निवर्तकत्वापत्तेर्मिथ्यात्वासिद्धेः । एतेन प्रत्यग्ब्रह्मैक्यं न विषयः, कर्तृत्वादेर्विरुद्धधर्मस्य सत्यत्वेनैक्यायोगात् । नापि तन्निवृत्तिः प्रयोजनम्, ज्ञानस्याज्ञानमात्रनिवर्तकत्वेन सत्यस्य ज्ञानान्निवृत्त्ययोगाद् इति प्राप्ते सत्यं कर्तृत्वभोक्तृत्वादिप्रपञ्चस्य सत्यत्वे विषयादि न सिध्यति प्रपञ्चस्तु मिथ्येति विवरणोक्तं निरस्तम् । तत्त्वंपदलक्ष्यचिन्मात्राभेदबोधाय कर्तृत्वादिमिथ्यात्ववर्णनस्यासङ्गतत्वात् । श्रुतिप्रामाण्याद् भेदबोधकप्रत्यक्षाद्याभासीकृत्य सत्यकर्तृत्वादिविशिष्टयोरेवाभेदबोधनोपपत्त्या वृथा ह्यध्यासकथा । अत एव प्रयोजनमप्यसम्भवि । न च कण्ठस्थस्य प्राप्तस्य विस्मृतस्य मणेरुपदेशवन्नित्यप्राप्तस्वरूपोपदेशः सार्थक इति वाच्यम्, मण्युपदेशस्य हि सुखं दुःखाभावश्च फलम् । न च प्रकृते स्वरूपभिन्नं प्राप्यं त्वन्मते किञ्चिदस्ति, स्वरूपात्मकस्य नित्यप्राप्तत्वेन मुक्तीच्छासम्भवात् । मुमुक्षुरधिकार्यपि तन्मते न सम्भवति । ननु जीवभिन्ने शास्त्रविषयत्वेन भवदभिमते सदनन्तगुणपूर्णे ब्रह्मणि मानाभाव इति चेन्न ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्विजिज्ञास तद् ब्रह्मेति जिज्ञास्यस्य गुणपूर्त्तिं वदन् ब्रह्मशब्द एव ह्यल्पगुणवत्त्वेनानुभूयमानाद् जीवाद् भिन्ने परेशे मानम् । प्रत्यक्ष-मपीशप्रतियोगिकजीवानुयोगिकभेदे मानम् । नाहमीश्वरो न सर्वज्ञ इत्यनुभवात् ।

योग्यधर्मावच्छिन्नप्रतियोगिताकयोग्याधिकरणकान्योन्याभा-वोहि योग्यः । अस्ति चेश्वरत्वं जगदुत्पत्त्याद्यनुकूलकृत्यादिमत्त्वं प्र-तियोगितावच्छेदकमधिकरणं जीवः तदुभयं च योग्यम् । विस्तरस्तु भेदपञ्चकप्रत्यक्षोपपत्तौ निराकरिष्यते ।

यत्तु कश्चित्, आत्मप्रत्यक्षे चक्षुरादेरयोग्यत्वात्तत्प्रत्यक्षा-सम्भव इति प्राह तन्न । मानसप्रत्यक्षसम्भवात् । ननु मनो न प्रमाणम् प्रमाणसहकारित्वात्, कालादिवदिति चेत्, किन्नामाप्र-माणत्वम् प्रमाकरणभिन्नत्वमिति चेत्, त्वगादौ साधनाव्यापकस्य प्रमाणान्तरासहकृतज्ञानजनकत्वाभावस्योपाधित्वं स्यात्, अबोध-कत्वमिति चेत्, सुखादिज्ञानजनके मनसि साध्यस्य बाधाप-त्तिः, आलोकादौ व्यभिचारश्च । न च सुखादिज्ञानं न मानसं किन्तु साक्षिरूपम्, दुःखादिप्रत्यक्षोत्पादविनाशानुभवविरो-धात् । न च दुःखज्ञानं नष्टमित्यनुभवस्य विषयनाश एव विषयः, व्यवहारस्य लाक्षणिकत्वे मानाभावात् । ननु बुध्यादिगोचरनित्य-साक्षात्कारानभ्युपगमे बुध्यादे-र्नियमेन मानसग्रहासम्भवेन तद्दशायां मया इदमनुभूतं न वा इदम् इच्छामि न वेत्यादि संशयः स्यादिति चेन्न, आरोपे सति निमित्तानुसरणम्, न तु निमित्तमस्तीत्यारोप इति संशयोपपादनासम्भवात् । फलबलेन मानसस्य कल्प्यत्वाच्

Digitization by Arya Samaj Charitable Foundation, Chennai

च । किं च त्वदभिमतं दुःखादिज्ञानं चिद्रूपं भ्रमस्तद्भिन्नं वा । नान्त्यः । तद्विषयस्य दुःखादेः सत्यतापत्तेः । नाद्यः, भ्रमे दोषजन्यत्वनियमात्, चैतन्ये तदसम्भवात् । न च चितो दोषाजन्यत्वे ऽप्युपाधेर्दोषजन्यत्वेन भ्रमत्वोपपत्तिः, उपाधिरिति-कृतनामकमनोवृत्तेरेव व्यवहारोपपत्तौ तदतिरिक्तचिद्रूपज्ञाने मानाभावात् । न च सुखदुःखाद्यवच्छिन्नं चैतन्यं सुखादिज्ञानम्, यदेव हि सुखावच्छिन्नं तदेव दुःखावच्छिन्नं चेत् सुखदुःखानुभवयोः साङ्कर्यापत्तिः, नो चेत् सदेशत्वापत्तिः । अतीतानागतसुखादिज्ञानानापत्तेश्च । दुःखाद्युपलक्षितस्य ज्ञानत्वे मोक्षे ऽपि दुःखाद्युल्लेखापत्तेश्च । न च मनसि मानाभावः । इन्द्रियाणां मनश्चास्मि मनःषष्ठानीन्द्रियाणीत्यादेर्मानत्वात् । अत एव मनो न प्रमाणं विशेषगुणानाश्रयद्रव्यत्वात् दिक्कालादिवत् इति निरस्तम् । मनसि दुःखादिप्रत्यक्षजनकताया ग्राहकेण मानेन बाधात् । अत एव आत्मतद्धर्मगोचरानीश्वरसाक्षात्कारो न विशेषगुणशून्यप्रमाणजन्यः साक्षात्कारत्वात् सम्मतवदिति निरस्तम् । नव्यैर्विशेषगुणानाश्रयद्रव्यानङ्गीकारेण कृप्तपार्थिवाद्यणूनामेव मनस्त्वस्वीकारेण चाद्ये ऽसिद्धेः । द्वियीये सिद्धसाधनात् । न च सन्निकर्षाभावान् न मनसा भेदग्रहः, संयुक्तविशेषणतारूपसन्निकर्षस्य सत्त्वात् । न च देशान्तरे ऽप्यात्मनि भेदप्रत्यक्षापत्तिः, यदवच्छेदेन मनस्संयोगः तदवच्छेदेनैव विशेषणतायाः सम्बन्धत्वात् । न च निरवयव आत्मनि अव्याप्यवृत्तिसंयोगासम्भवः, आत्मनिष्ठसंयोगस्य दिगादेरेवावच्छेदकत्वात् । न च दिगादिकमात्मन्यसम्बद्धं कथमवच्छेदकम्, वृत्त्यनियामकसम्बन्धेन दिगादेरात्मनि सम्बद्धत्वात्,

Digitization by Arya Samaj Charitable Foundation, Chennai

वृत्तिनियामकसम्बन्धेनावयवस्याप्यवयविनि असम्बद्धत्वाच् च । न च कर्णविवरावच्छिन्नाकाशं श्रोत्रं तस्य च सर्वस्मिन् सम्बन्धाभावात् तेन शब्दाभावग्रहणं न स्यादिति वाच्यम्, येनेन्द्रियेण हि यद् गृह्यते तेनेन्द्रियेण तत्सम्बन्धघटितविशेषणतया तदभावस्तत्र गृह्यते श्रोत्रस्य तु तादात्म्यं शब्दग्राहकं सम्बन्धः तद्घटितविशेषणतया तदभावग्रहणम् ।

वस्तुतस्तु, अयं श्रुतः शब्दो दूरस्थो विलक्षणध्वनिविशिष्टत्वात् इत्यनुमानात् स्वसंयुक्तावच्छिन्नत्वसम्बन्धेन श्रोत्रं शब्दस्य ग्राहकम्, तादृशसम्बन्धाभावकाले तत्पुरुषीयश्रोत्रेण तत्पुरुषीयशब्दप्रत्यक्षानुत्पत्तेः, शब्दस्य नाकाशसमवेतत्वं किन्तु शङ्खादिसमवेतत्वमेवेति स्वीकारे तु स्वसंयुक्तसमवेतत्वमेव सम्बन्धः-समवेतत्वं तादात्म्यम् एवं च तत्पुरुषीयकर्णस्यावच्छेद्यतासम्बन्धेन न हेतुत्वम् तत्पुरुषीयकर्णविच्छेदेनानुत्पद्यमानस्यापि दूरस्थस्य तत्पुरुषीयश्रोत्रेण ग्रहणात् । तार्किकमते तु गगनरूपत्वेन श्रोत्रस्य देशान्तरे गत्यसम्भवादुक्तरीत्या शब्दाग्राहकत्वमिति । श्रोत्रस्य चक्षुरादिवद्राजसाहङ्कारकार्यस्य नभोभिन्नत्वेन शब्दाभावादिग्रहणे क्षतेरभावः । न च बहिरस्वतन्त्रेण मनसा स्वाप्नगजादीनां प्रत्यक्षानुपपत्तिः, स्वतो बहिरस्वतन्त्रस्यापि सहकार्यन्तरमासाद्य गजादिधीजनकत्वासम्भवात् । सहकारी च स्वप्ने उद्बुद्धसंस्कारः स्मृतिर्वा । न च सुषुप्तौ मनसो ऽभावाद् उत्थितस्य सुखमहमस्वाप्समिति परामर्शानुपपत्तिरिति वाच्यम्, सुषुप्तावहमर्थस्याभावमङ्गीकुर्वतस्तवाप्यनुपपत्तेस्तुल्यत्वात् । सिद्धान्ते तु साक्षिरूपं प्रत्यक्षं नाहमीश्वर इत्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

दिभेदग्राहकम् , तद्गृहीते दुःखादौ सन्देहाद्यभावेन तस्य प्रमाणेषु श्रेष्ठत्वात् । न च कर्तुर्जीवस्योदासीनसाक्षाद्द्रष्टृत्वरूपसाक्षित्वानुपपत्तिः, विश्वासार्थमौदासीन्यस्य लोके उपयोगे ऽपि प्रकृते तदनुपयोगात् । दृष्टं हि विश्वासास्पदानां युधिष्ठिरादीनां वादिनामपि साक्षित्वम् ।

अत्र कश्चित् । देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकदेहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षीत्युच्यते । लोके ऽपि ह्यौदासीन्यबोधाभ्यामेव साक्षित्वं प्रसिद्धम् । यद्यपि जीवस्य वृत्तयः सन्ति देहद्वयभासिकास्तथा ऽपि सर्वतः प्रसृतेन स्वावच्छिन्नेन कूटस्थचैतन्येनेषत्सदाभास्यमेव देहद्वयम्, चैतन्यप्रतिबिम्बगर्भादन्तःकरणाद्विच्छिद्य विच्छिद्योद्गच्छद्भिर्वृत्तिज्ञानैर्भास्यते, अन्तरालकाले तु सह वृत्त्यभावैः कूटस्थचैतन्येनैव भास्यते, अत एवाहंकारादीनां सर्वदा प्रकाशसंसर्गात् संशयाद्यगोचरत्वम् । अन्यज्ञानधाराकालीनाहंकारस्यैतावन्तं कालमिदमहं पश्यन्नेवासमित्यनुसन्धानं चेति प्राह ।

तत्तुच्छम् । कूटस्थप्रकाशिते जीवस्य व्यवहारस्मृत्याद्यनापत्तेः । न चान्योन्याध्यासेन जीवैकत्वापत्त्या कूटस्थस्य जीवान्तरङ्गत्वात्तदुपपत्तिरिति वाच्यम् । तथा सति कूटस्थस्य कर्तुस्तादात्म्येन कर्तृत्वापत्तेः । एतेन यथा नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीं दीपयेदविशेषेण तदभावे ऽपि दीप्यते, तथा चिदाभासविशिष्टाहंकाररूपं जीवं विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वात् नृत्याभिमानिप्रभुतुल्यं तत्परिसरवृत्तितद्राहित्यात् सभ्यपुरुषतुल्यान् विषयान् नानाविधविकारवर्तित्वान्नर्तकीतुल्यां

Digitization by Arya Samaj Charitable Foundation, Chennai

धियं च दीपवत् सुषुप्त्यादावहंकाराद्यभानाद्दीप्यमानश्चिदाभासविशिष्टाहंकाररूपजीवभ्रमाधिष्ठानकूटस्थचैतन्यात्मा साक्षीति निरस्तम् । सुखमहमस्वाप्समित्यहमर्थस्यैव परामर्शात्, अन्योन्याध्यासेनोपपादने तु साक्षिणः कर्तृत्वस्याप्यापत्तेः ।

यत्तु अविद्योपाधिको जीव एव साक्षाद् द्रष्टृत्वात् साक्षी, लोके ऽपि ह्यकर्तृत्वे सति प्रष्टृत्वं साक्षित्वं प्रसिद्धम्; तच्चासङ्गोदासीनप्रकाशरूपे जीव एव साक्षात् सम्भवति । जीवस्यान्तःकरणतादात्म्यापत्त्या कर्तृत्वाद्यारोपभाक्त्वे ऽपि स्वयमुदासीनत्वादिति । तन्न, 'द्वासुपर्णा सयुजा सखायावेकः स्वाद्वत्त्यन्यो ऽनश्नन्नभिचाकशीति । विज्ञानं यज्ञं तनुते कर्ता शास्त्रार्थवत्त्वात्' इति जीवस्य कर्तृत्वोक्तेः । अस्मन्मते ऽपि जीवस्येशाधीनकर्तृत्वे ऽपि स्वतो ऽकर्तृत्वात्साक्षित्वोपपत्तेः, सुषुप्त्यादावन्तःकरणस्य सुखानुभवादिकं प्रति कर्तृत्वानुपपत्तेश्च । नचान्तःकरणोपहितस्य साक्षित्वं तद्विशिष्टस्य कर्तृत्वमिति वाच्यम्, धर्मिभेदे स्मृत्याद्यसम्भवस्य विज्ञापितत्वात्, एकस्यैव रूपभेदेन तत्त्वे स्वरूपेण साक्षित्वं ज्ञानवत्त्वादिना कर्तृत्वमित्यङ्गीकर्तृणामस्माकमपि क्षतेरभावात् ।

स्यादेतत्, इन्द्रियव्यापारस्याधिकरणग्रह एवोपयोगो ऽभावग्रहस्तु योग्यानुपलब्धिमात्रादिति नाभावप्रत्यक्षमिति चेन्न प्रमित्यन्तर कल्पने गौरवात् । न च तवा ऽपि विशेषणतायाः प्रत्यासत्तित्वज्ञानहेतुत्वकल्पनागौरवम्, तव प्रमितिरूपधर्मिकल्पनातो लाघवात्' अवग्रहे योग्यानुपलब्धिः सहकारिणी । अत्यन्ताभावग्रहे प्रतियोगितद्व्याप्येतरसकलतदुपलम्भककालिकत्वम् । अन्योन्याभावग्रहे च प्रति-

Digitization by Arya Samaj Charitable Foundation, Chennai

योगितावच्छेदक तद्व्याप्येतरसकलप्रतियोगितावच्छेदकोपलम्भककालिकत्वमनुपलब्धेर्योग्यत्वम् । अत एव पिशाचस्य भेदः स्तम्भे प्रत्यक्षो न तु पिशाचवतः, अत एव नाहमीश्वर इति भेदकोपलम्भप्रतीतिदशायाम् ईश्वरोपलम्भकसमवधानं नास्ति । तात्कालिकमनआदेस्तदयोग्यत्वादिति निरस्तम् । सर्वविषयकज्ञानादिमत्त्वरूपेश्वरत्वस्य मनआदियोग्यत्वात् । न च सर्वस्य ज्ञानं विना सर्वविषयावच्छिन्नस्य ज्ञानस्य प्रत्यक्षं न युक्तमिति वाच्यम्, अतीन्द्रियधर्मादिप्रत्यक्षं विना ऽपि तज्ज्ञानस्य प्रत्यक्षत्वात् सर्वविषयकज्ञाने सति सर्वस्य ज्ञानं विनेत्युक्तेस्तुच्छत्वाच्च । यद्वा यत्र यत्सत्त्वापादनेनानुपलम्भाभाव आपादयितुं शक्यस्तत्र तदभावो योग्यः । न चाभावाधिकरणे आपादितस्य प्रतियोगिसत्त्वस्यासत्त्वाविशेषान्न तदुपलम्भापादकत्वं क्वचिदपि सम्भवतीति वाच्यम्, आपाद्यापादकयोर्व्याप्तिरेव हि आपादने तन्त्रम्, न त्वापाद्यव्यतिरेकवत्यापादकस्य सत्त्वम् ।

ननु प्रतियोगिसत्त्वस्य तदुपलम्भेन सह व्याप्तौ गृहीतायामेव व्यापकानुभवाभावेन व्याप्यप्रमेयाभावानुभवाभ्युपगमे नियमेन व्यतिरेक्यनुमानसामग्रीसत्त्वेनाभावानुमितिरेव स्यान्न प्रत्यक्षमिति चेन्न, अनवबोधात् । अनुपलम्भः स्वरूपसन्नेव ह्यभावग्रहे हेतुः न तु ज्ञातो येन तज्ज्ञाने व्यतिरेकव्याप्तिमद्धेतोः पक्षधर्मताज्ञानादभावानुमितिः स्यात् । नहि भावयोर्व्याप्तिग्रहे नियमेनाभावधीरस्ति येन तत्र व्यतिरेकव्याप्तिधीः स्यात् । तत्कल्पने ऽपि समानविषये प्रत्यक्षसामग्र्या बलवत्त्वेन प्रत्यक्षस्यैव सम्भवाच्चेत्युपरम्यते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु प्रत्यक्षं भेदमात्रं विषयीकरोति स चाधिष्ठानात्मैव ततो भिन्नभेदसत्ताया आत्मस्वरूपातिरेके प्रत्यक्षस्योदासीनत्वाद् इति चेन्न भेदनिष्ठतया प्रतीताया ब्रह्मनिष्ठत्वं हि कथं कल्पनीयम् । न चानिदम्यपि रजते ऽधिष्ठानेदन्तानुभववद् ब्रह्मसत्ताया भेदे भानमिति वाच्यम्, असदेवात्र रूप्यमभान्नेदं रूप्यमित्यादिना रूप्यबाधकप्रत्यक्षवद् भेदबाधकप्रत्यक्षाभावात् । यथा हि घटो नष्टो घटो ऽनित्य इत्यनित्यत्वादिकमपि तन्निष्ठमेव तथा सत्यत्वमपि तन्निष्ठमेव ।

यत्तु तदात्मानं स्वयमकुरुतेति प्रतिपन्नब्रह्मविवर्तत्वस्य जगतो रज्वां सर्पादेरिवाधिष्ठानात्मसत्ताभिन्नसत्ताभावो घटादिसत्त्वे बाधकमिति तन्न, अन्तर्यामितया ऽऽत्मकरस्य श्रुत्यर्थत्वात् । नहि शुक्ती रूप्याकारमात्मानं करोतीति व्यवहारः । किञ्च घटः सन्नित्यादौ सत्त्वाश्रयाभेदो घटादौ भासते। तच्च निर्विशेषब्रह्माधिष्ठानमङ्गीकुर्वतस्तवासम्भवि । न च कल्पितसत्त्ववद् घटाद्यधिष्ठानम्, अधिष्ठानस्याधिकसत्ताकत्वनियमात् । विशिष्टस्य तव मिथ्यात्वात् । न च स्वतः सत्ताशून्यस्या ऽपि घटादेः सद्बुद्ध्युपपत्तौ सत्तान्तरकल्पने गौरवमिति वाच्यम् । ब्रह्मणि स्वरूपसत्त्वं घटादौ व्यावहारिकं रूप्यादौ प्रातीतिकमिति सत्तात्रैविध्यस्य त्वया ऽप्यङ्गीकारात् । प्रातिभासिकस्य सत्त्वं विनाऽपि सर्वप्रतीतिवद् ब्रह्मणो ऽपि सद्बुध्युपपत्तौ पारमार्थिकसत्त्वासिध्यापत्तेश्च । न चाभेदश्रुतेरप्रामाण्यापत्तिः, प्रत्यक्षविरोधात् वृत्त्यन्तरेणाप्रामाण्यात् ।

यत्तु भेदसत्ताग्राहिप्रत्यक्षस्य सत्तावैशिष्ट्यांशे प्रामाण्ये ऽपि भेदांशमात्रे विद्यमानार्थग्राहित्वाद्यथार्थानुभवत्वरूपं प्रामाण्यं न वि-

Digitization by Arya Samaj Charitable Foundation, Chennai

हन्यत इति तन्न । स्वरूपेण त्रिकालनिषेधप्रतियोगिनो विद्यमानत्त्वस्या ऽसम्भवात् । विद्यमानसत्त्वग्राहिणा त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वबोधकस्य प्रतिरोधसम्भवाच्च । किञ्च, विद्यमानं प्रत्यक्षेण गृहीतं भेदादिस्वरूपं श्रुत्या निषिध्यते न वा । आद्ये सुस्थोविरोधः, द्वितीये तत्स्वरूपस्य तात्त्विकत्वमेव निषेधकाभावात् ।

स्यादेतत्; भेदः किम् अधिकरणस्वरूपः तद्भिन्नो वा, नाद्यः, सापेक्षस्य भेदस्य निरपेक्षेणाधिकरणेनैक्यासम्भवात् । नान्त्यः, भेदभेदो ऽपि भिन्नः तद्भेदो ऽपि भिन्न इत्यनवस्थाद्यापत्तेः । कुम्भस्य स्तम्भाद् भेदे प्रतीते प्रतियोगित्त्वेन ज्ञानम् । तज्ज्ञाने च स्तम्भात् कुम्भस्य भेदधीरित्यन्योन्याश्रयाद्यापत्तेश्चेति चेन्न । भूतलत्वादिना निरपेक्षत्वेन भेदत्वेन सापेक्षत्वेन चाधिकरणात्मत्वे क्षतेरभावात् । न च भेदत्वभेदमादायानवस्था तद्भेदस्याप्यधिकरणरूपत्वात् । न चैवं भेदत्वमादायानवस्थापत्तिः । भूतलादौ घटत्वत्वावच्छिन्नं निरूपितमेकं भेदत्वत्वावच्छिन्नं निरूपितं चैकं भेदत्वमित्यनवस्थाऽभावात् भूतलनिष्ठघटनिरूपितभेदत्वस्य स्वनिरूपितभेदत्वाभिन्नत्वेनाप्युपपत्तेश्च । समवायवन्निरूपकभेदेन भेदत्वस्य भिन्नत्वाभावात् । भेदस्य भिन्नत्वे ऽपि हि न क्षतिः, अनवस्थायाः प्रामाणिकत्वेनादोषत्वात् । भेदप्रत्यक्षे प्रतियोगितावच्छेदकस्तम्भत्वादिप्रकारकज्ञानस्यैव हेतुत्वेनान्योन्याश्रयासम्भवात् । नहि भेदप्रत्यक्षे भेदाश्रयाद् भिन्नत्वेन प्रतियोगिज्ञानं हेतुः । अन्यथा जीवस्य ब्रह्मैक्यप्रतीतौ ब्रह्मणो जीवैक्यधीरित्यैक्येप्यन्योन्याश्रयः स्यात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्च, अन्योन्याश्रय उत्पत्तौ ज्ञप्तौ वा बाधकः । नाद्यः, भेदस्या नादित्वात्, न द्वितीयो भेदप्रतीतेस्तवाप्यावश्यकत्वात्, अन्यथा भेदभ्रमनिरासाय श्रवणाद्ययोगात्, भेदप्रतीतौ बहुयत्नैस्तन्निरासायोगाच्च। स्वपरपक्षदूषणभूषणादेर्भेदाप्रतीतौ बहुविप्लवापत्तेश्च । भेदः स्वरूपं धर्मो वेति विकल्पायोगाच्च । ब्रह्मण्यनृतजडपरिच्छिन्नभेदस्यासिध्यापत्तेश्च । दूषणस्य भूषणत्वं परपक्षस्य च स्वपक्षत्वं स्यात् । साधनचतुष्टयान्तर्गतनित्यानित्यवस्तुविवेकस्यासिद्धिः स्यात् । किञ्च । भेदबाधकं भेदमेव विषयीकरोति, उत अभेदं यद्वा यत्किञ्चित् । निर्विषयकज्ञानासम्भवान् नाद्यः, भेदाबाधकत्वात्, प्रत्युत भेदसाधकत्वात् । द्वितीये तदन्यस्तद्विरोधी तदभावो वा नञर्थो वाच्यः । पक्षत्रये ऽपि दुःपरिहरो भेदः तदनन्यत्वे तद्विरुद्धतद्भावत्वायोगात् । भेदाभावग्राहिणा ऽपि स्वस्मात् प्रतियोगिनश्च भिन्नतयैव स्वविषयस्य ग्राह्यत्वाच्च । औदासीन्येन प्रवृत्तस्येदमिति ज्ञानवदबाधकत्वाच्च । अत एव न तृतीयः, किञ्च, नायं भेद इति वा नास्त्यत्र भेद इति वा अन्यदेव भेदात्मना प्रत्यभादिति वा बाधकज्ञानेन भवितव्यम्, नेदं रजतमित्यादिवत् तदेतत् सर्वथा भेदावगाहीति कथं तद्भेदसामान्यबाधकम् । न चैकमेवानेकात्मना प्रत्यभादिति ज्ञानं बाधकमिति वाच्यम्, एकानेकयोर्वस्तुभेदाभावे वैलक्षण्याग्रहणे च तस्य बाधकत्वायोगात् । एवं च भेदाद् भिन्नतया स्वार्थं बाधधीर्गाहते न वा, आद्ये भेदः स्थिरो ऽन्त्ये तु न सा स्याद् भेदबाधिका, तस्मात् क्लृप्तविषयत्वान् नान्योन्याश्रयत्वादेरुत्थानम्, उत्थितस्य च भेदाभासत्वम् । एतेन यदुक्तं खण्डने ऽनि-

Digitization by Arya Samaj Charitable Foundation, Chennai

र्वचनवादिनीदं शोभते नास्मासु । प्रतिभासमानो ऽयं भेदः स्वरूपादिपक्षान्तर्भावबहिर्भावाभ्यां सदसत्त्वाभ्यां वा अन्येना ऽपि धर्मेण वा अनिर्वाच्य इत्यङ्गीकाराद् इति तन्निरस्तम् । तर्कबाध्यत्वमात्रेणानिर्वाच्यत्वे ऐक्यस्यापि तत्प्रसङ्गात् । न चैक्यं ब्रह्मस्वरूपमेव तद्बाधे शून्यापत्तिः, भेदस्याप्यधिकरणात्मकत्वेन तन्मात्रबाधे शून्यतायाः तुल्यत्वात् । स्वरूपस्याज्ञानाद्यधिष्ठानतया सदैव भानादुपदेशवैयर्थ्यात् । स्वरूपज्ञानस्य भेदादिज्ञानविरोधित्वाच्च । न हि भूतलमिति धीर्घटवत्त्वस्य घटवद्भेदस्य वा धियो विरोधिनी ।

किञ्च ब्रह्मण्यनृतादिभेदो ब्रह्मज्ञानाबाध्यो वाच्यः । शून्याद्यनात्मकघटादौ शून्यादितः स्वज्ञानाबाध्यभेददर्शनात् । न च ब्रह्मणः स्वेतरसर्वाधिष्ठानत्वादनृतादिभेदस्तद्धीबाध्य एव, घटस्यानधिष्ठानत्वान् न तद्धीर्भेदबाधिकेति वाच्यम्, यत्र तादात्म्येन यदध्यस्तं तत्प्रतियोगिकभेदं प्रति तस्याधिष्ठानताया व्याहतत्वात् । नहि शुक्त्यध्यस्तरूप्यप्रतियोगिकभेदं प्रति शुक्तिरधिष्ठानम् । न च घटे कल्पितघटान्तरभ्रमस्थले तादात्म्यमपि कल्पितम् । कल्पितघटप्रतियोगिकभेदस्य वास्तवघटे वास्तवत्वात् । एकस्मिन् भेदमात्रस्य कल्पने तु अभेदस्यैव वास्तवत्वात् । भेदाभावे गुरुशिष्यादिव्यवस्थानुपपत्तेश्च । न च तात्त्विकभेदाभावे ऽपि कल्पितभेदेन गुरुशिष्यस्वपक्षपरपक्षदूषणभूषणसत्यानृतादिव्यवस्थोपपत्तिरिति वाच्यम्, कल्पितेन भेदेनाकल्पिताभेदकार्यप्रतिबन्धासंभवात् । न च कल्पितया विधया स्वप्रकाशरूपब्रह्मकार्यं कल्पितकान्तया विश्लेषकार्यमिव प्रतिबध्यत इति वाच्यम्, परमार्थसतः कल्पितकान्ताज्ञानस्यैव विश्लेष-

Digitization by Arya Samaj Charitable Foundation, Chennai

कार्यप्रतिबन्धकत्वात् । किञ्च । व्यावहारिकसत्त्वार्थं त्वया ऽप्यन्योन्याश्रयादिकं समुद्धरणीयम्, परस्परसापेक्षेण व्यवहारस्याप्यभावात् । नहि व्यावहारिकमृदः स्वजन्यघटसापेक्षत्वम् । न च ममाविद्यासामर्थ्यात् सर्वानुपपत्तिपरिहारः, अविद्यासहितप्रपञ्चं प्रत्यविद्याया एवाधिष्ठानत्वापत्तेः । आत्माश्रयादिदोषस्याविद्यासामर्थ्येनैव निरासात् । अपि च, कथमत्रापादनक्रमः, यदि भेददर्शनं स्यात् तर्ह्यन्योन्याश्रयादिकं स्यात्, न च तद्युक्तम् । तस्मात् नास्ति भेददर्शनमिति वा, यदि भेददर्शनं वास्तवं स्यात् तर्हि अन्योन्याश्रयादिकं स्यादिति वा, यदि भेददर्शनं प्रमा स्यात् तदा ऽन्योन्याश्रयादिकं स्यादिति वा । यदि भेददर्शनं प्रतियोग्यादिसापेक्षं स्यात् तदा ऽन्योन्याश्रयादिकं स्यादिति वा । नाद्यः, यदि भेददर्शनं न स्यात् तदा परः परमतमिव स्वमतमपि निराकुर्यात् । सकलव्यवहारविधुरश्च स्यादित्यादि प्रतिकूलतर्कपराहतेर्भेदादर्शने तन्निरासायोगेन विपर्ययापर्यवसानाच्च । न द्वितीयः, वास्तवे ऽन्योन्याश्रयादेरभावेन व्याप्तिवैकल्यात्, दर्शनावास्तवत्वे ऽपि अभेदवद्भेदस्या ऽपि सत्त्वोपपत्तेश्च । न तृतीयः । त्वया स्तम्भात् कुम्भस्य भेदप्रतीतौ कुम्भात् स्तम्भस्य भेदधीरिति प्रतीतावेवान्योन्याश्रयस्योक्तत्वेन चौरापराधान्माण्डव्यस्य शूलप्राप्तिवत् प्रतीतिगतेनान्योन्याश्रयेण प्रमात्वनिषेधायोगात् । न च प्रतीतेर्विचारासहत्वेन भ्रमत्वम् । विचारासहप्रपञ्चान्तर्गतचरमवृत्तिवत् प्रमात्वोपपत्तेः रूप्यादिभ्रमस्या ऽपि त्वया ऽख्यातिवाद्युक्तहेत्वभावादिबाधकानाम् उद्धृतत्वेन विचारसहत्वाच्च । चतुर्थे ऽपि सापेक्षतामात्रं निवर्ततां भेददर्शनस्य किमायातम्,

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकारान्तराभावात् स्वयमपि निवर्तत इति चेन्न । प्रतीतेः परेणाप्यपेक्षणीयत्वेन निवर्तयितुमशक्यत्वात् । प्रमात्वनिवर्तने च सामर्थ्याभावस्योक्तत्वात् , अन्यथा स्वाभिमताद्वैतमपि न सिध्येदित्युक्तम् ।

किञ्च । तत्पक्षे घटस्य पटाद् भेद इव घटेनाऽभेदोऽपि व्यावहारिकः । उक्तरीत्या ब्रह्मजीवैक्यमिवानृतव्यावृत्तिरपि तात्त्विकीति कथमभेदमुपेक्ष्य भेदे द्वेषः । एवं च, ब्रह्मण्यनृतभेदस्य सत्यत्वे कलशे स्वतः अभेदस्य च मिथ्यात्वे भेदे द्वेषस्तु किंकृत इति सामान्यतो भेदखण्डनाभासपराजयः ।

यत्तु अविद्यादिद्वितीयनिवृत्त्यत्यन्ताभावजीवब्रह्मैक्यादेः सापेक्षस्य निरपेक्षब्रह्मात्मकत्वं यथा तथा सापेक्षभेदस्य निरपेक्षघटादिरूपत्वमित्युक्तम् । अविद्यानिवृत्त्यादेः सापेक्षत्वस्याऽऽविद्यकतया तात्त्विकनिरपेक्षत्वाविरोधित्वादिति । तन्न, निवृत्त्यादिनिष्ठसापेक्षत्वस्य बाधकाभावेनाऽऽविद्यकत्वे मानाभावात् । नहि निवृत्त्यादिकं प्राक् सापेक्षम् इदानीं नेति बाधधीः कदाप्यस्ति । नहि बाधं विना ऽन्यदाविद्यकत्वे मानमस्ति । अन्यथा त्वदभिमतं ब्रह्माप्यसत् । श्रुत्युक्तसत्त्वं च तस्याऽऽविद्यकमिति स्यात् ।

किञ्च अविद्यानिवृत्तिद्वितीयात्यन्ताभावादिनिष्ठसापेक्षत्वस्याऽऽविद्यकत्वे ऽविद्यानिवृत्तिद्वितीयाभावादेर्व्याघातः । तस्यैवाद्वितीयत्वात् अविद्यात्वाच्च । अविद्यानिवृत्तिद्वितीयाभावादेः ब्रह्माभिन्नत्वे ब्रह्मस्फुरणे तस्याऽपि स्फुरणात् तद्विरोधिप्रपञ्चस्फुरणानुपपत्तेश्च । नहि रजताभावाभिन्नशुक्तिस्फुरणे रजतस्फुरणम् । न वा तद्ग्रहीतुर्भ्रान्तत्वम् । न च भ्रमकालेप्रपञ्चाभावब्रह्मणोर्न तत्त्वेन स्फुर-

Digitization by Arya Samaj Charitable Foundation, Chennai

णाम् किन्त्विदन्त्वेनेति वाच्यम् । तत्त्वेदन्त्वयोर्भासमानब्रह्माभिन्नत्वेऽभानासंभवादिति सन्तोष्टव्यम् ।

किञ्च । यत्र यदध्यस्तं तत्र तद्विरोधितज्ज्ञानाबाध्यम् । यथा शुक्तावरूप्यत्वम् । यत्र यदैक्यं वा ऽध्यस्तं तत्र तद्भेदस्तज्ज्ञानाबाध्यः । यथा दूरस्थवनस्पत्योर्भेदः । यत्र यदध्यस्तं तत्र तद्विरोधि तात्त्विकम् । यथा ब्रह्मण्यनृतत्वस्याध्यस्तत्वे सत्यत्वं तात्त्विकमिति व्याप्तेः । जीवेशाद्यैक्यस्याध्यस्तत्वे भेदस्तात्त्विको ऽनध्यस्तत्वे त्वैक्यप्रतियोगिकभेदस्तात्विकः स्यात् ।

न च ऐक्यस्य ब्रह्मभेदो नाङ्गीक्रियत इति वाच्यम् । ऐक्यस्य निरपेक्षब्रह्माभिनत्वे तत्त्वं पदार्थपराणां सत्यं ज्ञानमनन्तं विज्ञानघनइत्यादीनामैक्यपरमहावाक्यैकवाक्यत्वाभावेन वैयर्थ्यापत्तेः ।

न च ऐक्यस्य स्वप्रकाशब्रह्माभिन्नतया स्थितिप्रतीत्यादौ सापेक्षत्वे ऽपि लक्षितार्थभेदभ्रमनिवर्तकवृत्तिजनने पदार्थसापेक्षतया स्वरूपपरवाक्यानाम् एकवाक्यतायाः सत्त्वात् , भेदरूपप्रतियोगिसापेक्षत्वेन तत्र सापेक्षत्वव्यवहार इति वाच्यम् , निर्विशेषब्रह्माभिन्नैक्यस्य कुत्रा ऽपिसापेक्षत्वासंभवात् । अभावसादृश्यादेः सप्रतियोगिकत्ववत् ऐक्ये सापेक्षतायाः स्वाभाविकत्वात् ।

एतेन मन्मते ऽविद्यानिवृत्त्यद्वैतयोः सापेक्षयोरपि ब्रह्मैक्यमस्तु । तत्राभावत्वसापेक्षत्वादेर्मायिकत्वेन विरोधाभावात् । तव तु सापेक्षत्वनिरपेक्षत्वयो स्तात्त्विकत्वेन विरोधस्य दुःपरिहरत्वादिति निरस्तम् । त्वदभिमताद्वैतश्रुतिबोध्यस्याभावत्वादेः कल्पितत्वायोगात् । श्रुतेरप्रामाण्यापत्त्या द्वैतनिवृत्त्यादेरसिध्यापत्तेः । ज्ञानस्य ज्ञानत्वेन

Digitization by Arya Samaj Charitable Foundation, Chennai

दण्डादेः कारणत्वेनाभावसादृश्येच्छादेस्तत्त्वेन सापेक्षत्वे ऽपि प्रमेयत्वदण्डत्वादिना निरपेक्षत्ववद् भेदत्वेन सापेक्षत्वे ऽपि घटत्वादिना निरपेक्षत्वोपपत्तेश्च । नह्यस्माभिरेकरूपेणोभयमुररीक्रियते ।

न च भेदस्याधिकरणरूपत्वे संशयानुपपत्तिः, धर्मिज्ञाने भेदाज्ञानाभावात्, तदज्ञाने संशयहेतोर्धर्मिज्ञानस्याभावादिति वाच्यम्, भेदत्वेनाज्ञाने ऽपि घटत्वदण्डत्वाज्ञानात् संशयोपपत्तेः। चैतन्ये स्वप्रकाशे सदा भासमाने तदभिन्नस्य जीवैक्यद्वितीयाभावानवच्छिन्नानन्दादेरप्रकाशस्य निर्विशेषवादे ऽनुपपत्तेः प्रकाशे विप्रतिपत्तेरनुपपत्तेः । उपदेशानर्थक्यापत्तेश्च ।

न चैक्यादीनां स्वप्रकाशब्रह्माभिन्नत्वे ऽपि तस्याज्ञानतत्कार्यविप्रतिपत्त्यादीन् प्रत्यविरोधितया तद्गोचरवृत्तिरेव तद्विरोधिनीति वाच्यम् । अज्ञानाद्यधिष्ठानस्य वृत्तेरपि सत्त्वात्, तत्तदैन्द्रियकाधिष्ठानज्ञानं विना तत्तदिन्द्रियजन्याध्यस्तज्ञानासम्भवात्, समर्थितं च विवरणे । घटोस्तीत्यादावस्तित्वशब्दितब्रह्मसत्तायां प्रतिपन्नस्य घटादेर्घटो नास्तीत्यादि प्रत्यक्षेण तस्यामेवाभावावगाहनमिति, प्रत्यगर्थवदेव वृत्त्यभावे ऽपि स्वतो भासमाने विप्रतिपत्त्याद्ययोगाच्च ।

यदि चैक्यस्या ऽविद्यावरणाद् अप्रकाशस्तर्हि भेदस्या ऽपि सादृश्यादिदोषादप्रकाश इति समम् । एवं च स्वरूपत्वे ऽपि भेदस्य युज्यते संशयादिकम् । स्वप्रभप्रत्यगात्मत्वेऽप्यभेदे संशयादिवदिति । न चाज्ञानाश्रयत्वादिना प्रत्यगर्थप्रकाशमुपजीव्य नाविद्या ऽऽवृणोति, ऐक्याद्यंशं त्वावृणोत्येवेति वाच्यम् । निर्विशेषब्रह्मण्यंशत्वादिकल्पनाया निराकरिष्यमाणत्वात् । साकारतापत्तेश्च ।

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्तु भेदस्याधिकरणात्मत्वे घटभेदयोरेकतरपरिशेषापत्तिः घट इति भेद इति विलक्षणव्यवहारो न स्यादिति। तन्न, घटत्वभेदत्वादीनां निमित्तानां भेदादेकतरपरिशेषाभावविलक्षणव्यवहाराद्युपपत्तेः। अर्थप्रकाशात्मकत्वनिरूपाधिकेष्टत्वरूपयोर्ज्ञानत्वानन्दत्वरूपविशेषणयोरनेकत्वेन विज्ञानानन्दावितिवत् ।

एतेन भेदस्य स्वरूपत्वे अस्य भेद इदं भिन्नमिति सम्बन्धित्वेन धीर्न स्यात् । प्रत्युत घटो भेद इति धीः स्यादिति निरस्तम्। जीवब्रह्मणोरैक्यम् आनन्दो ब्रह्मण इतिवदुपपत्तेः। नहि एकं ब्रह्मेतिवदैक्यं ब्रह्मेत्यस्ति । न च प्रमाणासिद्धे ह्यैक्ये भेदव्यवहारस्यौपचारिकत्वं कल्प्यते राहोः शिर इतिवदिति वाच्यम् । प्रकृतेऽपि भेदस्य स्वरूपात्मकत्वे प्रमाणासिद्धे व्यवहारस्यौपचारिकत्वकल्पनायास्तुल्यत्वात् । ननु भेदत्वं निर्वक्तुमशक्यम्, तद्धि न तावज्जातिः । सामान्यादिसाधारण्यात् । नाऽपि तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वादिरूप उपाधिः । तादात्म्यस्याभेदरूपत्वेऽन्योन्याश्रयापत्तेः । तन्निष्ठासाधारणधर्मरूपत्वे तदवच्छिन्नप्रतियोगिताकात्यन्ताभावेऽतिव्याप्तेः । तस्याऽपि स्वरूपत्वेऽनुगतव्यवहारानापत्तेरिति चेन्न । भेदत्वादेरखण्डोपाधित्वात् । किञ्च । निर्विशेषवादिमते सत्यं ज्ञानमनन्तमित्यादिविलक्षणव्यवहारानुपपत्तिः । न च कल्पितधर्ममादाय विलक्षणव्यवहारोपपत्तिः । श्रुतिबोध्यानां कल्पितत्वासम्भवात् । श्रुतेरखण्डार्थकत्वहानेश्च । न हि ब्रह्म सत्यज्ञानादिरूपं नेति वाधकमस्ति येन सत्यत्वादिकं कल्पितमभ्युपेतव्यम्। न चारोपे वाधं विनाऽन्यन्मानमस्ति । न च श्रुतस्तेत्र तात्पः

Digitization by Arya Samaj Charitable Foundation, Chennai

र्याभावः । व्यावहारिकस्याऽपि सत्यत्वादेरसिध्यापत्तेः । नहि यजमानः प्रस्तर इति वाक्यविषयो यजमानप्रस्तरयोरभेदो व्यावहारिकः सिध्यति ।

नन्विदमस्माद्भिन्नमिति वा अस्यामुष्माद् भेद इति वा धर्मिप्रतियोगिघटितत्वेन भेदग्रहणोऽन्योन्याश्रयः । धर्मिप्रतियोगिज्ञाने भेदज्ञानम् । तस्मिन् सति अस्यामुष्मादिति विलक्षणधर्मिप्रतियोगिज्ञानमिति । यदि तु घटपटौ भिन्नाविति घटपटविशेषणतया घटपटयोर्भेद इति तद्विशेष्यतया वा गृह्येत तदाऽपि घटपटप्रतीतौ तद्विशेषणत्वादिना भेदप्रतीतिः, भेदप्रतीतौ च द्वित्वावच्छिन्नघटपटप्रतीतिरित्यन्योन्याश्रय एवेति चेन्न । व्यावहारिकभेदप्रतीतेस्त्वयाप्यङ्गीकारात् ।

किञ्च । अस्तीदं न जानामि सर्वं खल्विदं ब्रह्मेत्यादिषु साक्षिसिद्धकालविषय सर्वैस्सह वस्त्वज्ञानाभेदानाम् इवेहाऽपि साक्षिसिद्धेन प्रतियोगिना सहैव व्यावृत्तिप्रतीतेर्नान्योन्याश्रयः ।

ननु विशिष्टज्ञानस्य विशेषणज्ञानाजन्यत्वेऽपि प्रतियोगिसविकल्पकस्याभावज्ञानं प्रत्यन्वयव्यतिरेकाभ्यां जनकत्वं वर्तते । उक्तं च मणिकृता, अन्यथा निर्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः । साक्षी च प्रामाणमनपेक्ष्य प्रतियोगिघटादिकं धर्मिभिन्नतया न गृह्णातीति कथं साक्षिसिद्धप्रतियोगिना सह भेदग्रहोपपत्तिरिति चेन्न । विशिष्टवैशिष्ट्यावगाहिबोधं प्रति विशेषणतावच्छेदकघटत्वादिप्रकारकनिर्णयस्यैव हेतुत्वात् । घटभेद इत्यादौ घटादिविशेषणं घटत्वादि विशेषणतावच्छेदकं तत्प्रकारकनिर्णयो हेतुर्न तु धर्मिभिन्नत्वादिप्रकारकनिर्णयः । . . . .

Digitization by Arya Samaj Charitable Foundation, Chennai

एतेन धर्मितावच्छेदकप्रतियोगितावच्छेदकयोर्भेदाज्ञाने प्रतियोगिताद्यवच्छेदकतयाऽभावनिरूपकत्वस्यैवासम्भवः । अन्योन्यधर्मभेदज्ञाने च विशेष्यस्तम्भात् कुम्भस्य भेदप्रतीतौ कुम्भात् स्तम्भस्य भेदधीरित्यन्योन्याश्रय इति निरस्तम् । तवाऽपीदमनेनाभिन्नमस्यामुष्माद् अभेद इमे अभिन्ने एतयोरभेद इत्येवं हि जीवब्रह्मणोरैक्यप्रतीतिः स्यात् । तथा च धर्मिप्रतियोगिभावधीर्द्वित्वावच्छिन्नधीश्च भेदज्ञानाधीनेति तद्विरुद्धाभेदज्ञानानुपपत्तिः ।

न च काल्पनिकभेदज्ञानस्य धर्मिप्रतियोगिभावद्वित्वावच्छिन्नज्ञाननिर्वाहकस्य तात्त्विकाभेदज्ञानप्रतिबन्धकत्वं नास्ति इति वाच्यम् । विषमसत्ताकाभेदज्ञानभेदज्ञानयोर्विरोधाभावेन भेदज्ञानानुच्छेदापत्तेः । भेदमिथ्यात्वसिद्धौ बाधकाभावात् जीवब्रह्मणोर्वास्तवमैक्यं सिध्येत् , तत्सिद्धौ च भेदस्य मिथ्यात्वसिद्धिरित्यन्योन्याश्रयात् । नचाभेदज्ञानेन धर्मिप्रतियोगिज्ञानापेक्षा, तस्य निष्प्रतियोगिकवस्तुस्वरूपत्वात् । सप्रतियोगिकत्वव्यवहारस्तु निरूपकभेदस्य सप्रतियोगिकत्वेनेति वाच्यम् , निष्प्रतियोगिकस्याऽपि घटादेः स्वाभावाभावत्वेन भाने सप्रतियोगिकत्वात् । अन्यथा महावाक्यार्थभेदप्रतियोगिसमर्पकसत्यादिवाक्यस्य वैयर्थ्यापत्तेः । निरपेक्षवस्त्वभिन्नस्य भेदस्य निरपेक्षत्वं, सापेक्षत्वव्यवहारस्त्वभेदरूपप्रतियोगिसापेक्षत्वादित्यापत्तेश्च ।

ननु भेदः किं भिन्ने उताऽभिन्ने । आद्ये अनवस्थात्माश्रयान्योन्याश्रयादिः, द्वितीये विरोध इति चेन्न, अभेदोऽभिन्ने उत भिन्ने । आद्ये अनवस्थाद्यापत्तेः, द्वितीये विरोधात् । एवमनिर्वा-

Digitization by Arya Samaj Charitable Foundation, Chennai

च्यत्वं तद्वति वर्तते, तदभाववति वा । आद्ये, आत्माश्रयाद्यापत्तेः, द्वितीये विरोधात् । न चाभेदस्य स्वरूपत्वेन तद्विकल्पानवकाशः । अनिर्वाच्यत्वादावस्य विकल्पस्यानिर्वाच्यत्वप्रयोजकस्य मदनुकूलत्वादिति वाच्यम्, भेदस्याप्यधिकरणरूपत्वात्, उक्तविकल्पप्रतिघातेन व्यावहारिकानिर्वाच्यत्वासिध्यापत्तेरिति । अन्ये ऽप्येवं क्षुद्रोपद्रवाः परिहार्याः । तदुक्तम् ।

एतादृशस्य वक्तारौ उभौ जात्युत्तराकरौ । मायी माध्यमिकश्चैव तावुपेक्ष्यौ बुभूषुभिः" इति विशिष्य भेदखण्डनाभासपराजयः ।

वस्तुतस्तु अस्मन्मते भेदो वस्तुना सविशेषाभिन्नस्ततश्चाभिन्नत्वान् नानवस्थादि । भेदप्रतिनिधेश्च विशेषस्य सत्त्वान्नापर्यायत्वादिकम् । विशेषश्च भेदहीने ऽप्येकतरनिर्वाहकः । तदुक्तम् ।

भेदहीने त्वपर्यायशब्दान्तरनियामकः । विशेषो नाम कथितः सो ऽस्ति वस्तुष्वशेषतः इति ।

अद्वैतिनामपि विशेषाङ्गीकार आवश्यकः । अन्यथा विज्ञानमानन्दं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेत्यादौ पर्यायता स्यात् । भ्रमाधिष्ठानत्वादिना चैतन्यस्य सदा भाने ऽपि तदभिन्नानन्दस्येदानीमप्रकाशानुपपत्तिश्च । ज्ञानानन्दयोरेकतरपरिशेषे च मोक्षे आनन्दप्रकाशो न स्यात् । न च कल्पितसत्यत्वादिविशिष्टस्य वाच्यत्वाद् अपर्यायत्वाद्युपपत्तिः, लक्ष्यं त्वखण्डं ब्रह्मेति वाच्यम् । गङ्गापदलक्ष्यतीरस्यागङ्गात्ववत्सत्यादिपदलक्ष्यस्यासत्यत्वाज्ञानत्वपरिच्छिन्नत्वाब्रह्मत्वापत्तेः । न च जहदजहल्लक्षणायां नासत्यत्वाद्यापत्तिः । वाच्यात् सत्यादेरधिकस्यार्थस्य लाक्षणिकबोधे ऽभाने लक्षणावैय-

Digitization by Arya Samaj Charitable Foundation, Chennai

र्थ्यापत्तेः, नहि वाच्य एवार्थे पदस्य लक्षणा दृष्टा युक्ता वा । तत्त्वमसीत्यत्र शोधिततदादिपदार्थाद् वाक्यार्थस्यैक्यस्य न तावत् त्वन्मते भेदो भेदाभेदौ वा । ऐक्यस्य मिथ्यात्वाद्यापत्तेः । तत्र विशेषो न चेत् कथं स्वप्रकाशचैतन्यप्रकाशेऽप्यैक्यस्या ऽप्रकाशः । चित्प्रकाशस्य भेदभ्रमाविरोधित्वे ऽपि तदभिन्नैक्यप्रकाशस्य तद्विरोधः । चितो निरपेक्षत्वे ऽप्यैक्यस्य सापेक्षत्वादिकम् । समवायः सम्बन्धः सत्ता सती भेदो भिन्नः अन्त्यविशेषो व्यावृत्तः कालः सदा ऽस्ति देशः सर्वत्र इत्यबाधितव्यवहारार्थं विशेषोऽवश्यमभ्युपेयः । प्रमेयत्वं प्रमेयं घटाभावे घटो नास्तीत्यादावभेदे धर्मधर्मिभावाधाराधेयभावादेर्विशेषानङ्गीकारे ऽनुपपत्तेः । स च विशेषो वस्त्वभिन्नः स्वनिर्वाहकश्चेति नानवस्था । तस्य तथात्वं धर्मिग्राहकमानसिद्धम् । यत्र भेदाभावो भेदकार्यं च प्रमितं तत्रैव विशेषः कल्प्यत इति न प्रमितघटपटेशजीवादिषु विशेषमादाय भेदत्यागः । नहि सोमलताभावे तत्प्रतिनिधिः पूतीक इति तल्लाभे ऽपि सः । एवं च सति सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानमानन्दं ब्रह्मेति श्रुत्या हरेः सच्चिदानन्दरूपत्वोक्तिः आनन्दं ब्रह्मणो विद्वान् यः सर्वज्ञ इत्यादि श्रुत्या तेषां तद्धर्मकत्वोक्तिश्च सङ्गच्छतेतराम् ।

न चैवं धर्मान् पृथक् पश्यंस्तानेवाभिधावतीति श्रुत्या गुणानां धर्मिपार्थक्यनिषेधात् धर्मधर्मिभावहानि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादीनां पर्यायतापत्ती स्याताम् । के चित्तु । गुणगुणिनोर्भेद एव । न चानवस्थादिदोषः, प्रामाणिकत्वात् , क्व चित् स्वनिर्वाहकत्वाद्वा । न च ब्रह्मणो ज्ञानादिधर्मत्वे जडत्वाद्यापत्तिः । ज्ञानादिस्वरूपत्वस्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्यभ्युपगमात् । न च ज्ञानादिद्वयवैयर्थ्यं प्रमाणेन प्रयोजनमुखानिरीक्षणात् । न च स्वरूपधर्मयोः ज्ञानादिरूपत्वे भेदानुपपत्तिः । दण्डी पुरुष इत्यत्र दण्डपुरुषयोः पार्थिवयोर्दण्डत्वपुरुषत्वाभ्यां यथा भेदस्तथा स्वरूपधर्मयोर्ज्ञानानन्दादिरूपयोर्द्रव्यत्वगुणत्वाभ्यां भेदः । न चोक्तश्रुतिविरोधः, तया ब्रह्मगुणानां यावद्द्रव्यभावित्वप्रतिपादनात् । ब्रह्मगुणविषयकानित्यत्वज्ञानस्यैव निन्दितत्वात् । द्रव्ये विद्यमाने ऽपि पाकादिना रूपादयो गुणा नश्यन्ति यथा न तथा हरौ विद्यमाने तद्गुणा ज्ञानादयो नश्यन्ति इत्यर्थे श्रुतेस्तात्पर्यमित्याहुः ।। इति विशेषसमर्थनम् ।

नन्वीश्वरस्याप्रत्यक्षत्वात् तत्प्रतियोगिकः तद्धर्मिकभेदो न प्रत्यक्ष इति चेन्न । ईशधर्मिकभेदस्य जीवाप्रत्यक्षत्वे ऽपि स्वधर्मिकभेदो हि जीवप्रत्यक्षः । नाहं सर्वज्ञो नाहमीश्वर इत्यनुभवात् । प्रतियोगिनः पिशाचस्या ऽयोग्यत्वे ऽपि स्तम्भः पिशाचो नेति तद्भेदस्य प्रत्यक्षत्वात् । अधिकरणस्य स्तम्भादेः प्रतियोगितावच्छेदकस्य च पिशाचत्वस्य जातिरूपस्य योग्यत्वात् । जातिमात्रस्य प्रत्यक्षयोग्यत्वात् । व्यक्तेरयोग्यत्वात् पिशाचस्य न प्रत्यक्षम् । यत्र प्रतियोगितावच्छेदकस्य सत्त्वमनुपलब्धिविरोधि तत्र तदवच्छिन्नप्रतियोगिताको भेदो योग्यः, प्रकृते च प्रतियोगितावच्छेदकमीश्वरत्वं सर्वविषयकज्ञानेच्छाकृतिमत्त्वम्, तच्च योग्यमेवम् ईशधर्मिकजीवभेदे ऽपि तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप । उत्तमः पुरुषस्त्वन्य इत्यादि–तद्वचनानुमितप्रत्यक्षं मानम् ।

ननूक्तानुभवस्यान्तःकरणाद्यवच्छिन्नचैतन्ये ऽविद्यावच्छिन्न-

Digitization by Arya Samaj Charitable Foundation, Chennai

चैतन्यप्रतियोगिकभेदावगाहितया शुद्धचैतन्यधर्मिकनिर्दुःखादिप्रतियोगिकभेदानवगाहित्वमिति चेत् न, यो ऽहमस्वाप्सं यस्य ममाज्ञानं संसारादि सो ऽहं निर्दुःखो नेति सुषुप्तिकालीनान्तःकरणानवच्छिन्नाभेदेनाज्ञानाद्याश्रयाभेदेन च प्रत्यभिज्ञायमाने शुद्धे भेदप्रतीतेः । संसाराधारस्य तदनाधाराद्भेद एव ह्यावयोर्विवादो न तु चैतन्यस्य चैतन्यान्तरात् । न चैतावता ज्ञानावच्छिन्न एव भेदग्रहो न तु शुद्धे । नहि सुषुप्तिकाले अन्तःकरणावच्छिन्नत्ववदज्ञानानवच्छिन्नत्वमप्यस्तीति वाच्यम् । अज्ञानकल्पितस्य शुद्धस्यैवाज्ञानाश्रयत्वात् । आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवलेति त्वद्राद्धान्तात् । एतेना ऽहंधीविषयभिन्नचिदात्माज्ञानदशायां तस्यैवाज्ञानाद्याश्रयाभेदारोपेण तथा ऽनुभवः, तज्ज्ञानदशायां तु नेशभेदो गृह्यते, नह्यहंधीविषयात्मा ईशाद् भिन्न इति कश्चिदनुभवति । अधिष्ठानचैतन्यस्य सुषुप्त्यादिधर्मित्वे तस्यैव कल्पितभेदाश्रयतया यो ऽहमज्ञो ऽस्वाप्सं सो ऽहमीशाद् भिन्न इत्यनुभव इत्याश्रमोक्तं निरस्तम् । अहमर्थात्मनोभेदसिद्धौ अहमस्वाप्समित्यादिप्रतीतेरारोपत्वसिद्धिः तस्या आरोपत्वसिद्धौ बाधकाभावादहमर्थात्मनोर्भेदसिद्धिरित्यन्योन्याश्रयात् । अहमर्थातिरिक्तात्मप्रत्यक्तस्यालीकत्वात् , अन्तःकरणाधिष्ठानस्य शुद्धस्य सुषुप्त्यनाश्रयत्वात्, नहि अस्वाप्समित्यनुभवो निर्विशेषे ऽस्ति । विशिष्टस्याज्ञानाद्यनाश्रयत्वात् ,

यच्चाश्रमेणोक्तम् , भेदग्रहे योग्यानुपलब्धिः सहकारिणी, सा चा ऽत्र नास्ति पित्तोपहतनयनस्य सत्यपि शंखे श्वेताभेदे तदनुपलब्धिवत् सतो ऽपि जीवे ब्रह्माभेदस्याविद्यादोषेणानुपलम्भसम्भवात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अनृते नहि प्रत्यूढा अविद्यामन्तरे वर्तमानाः, अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इत्यादिनावरणोक्तेरिति,

तत्तुच्छम्, सर्वविषयकज्ञानादिमद्भेदे आवरणस्य व्याहतत्वात् अङ्गुल्यवष्टब्धनेत्रं प्रति सूर्यावरणवज्जीवं प्रतीशावरणं हि श्रुत्यादिनोक्तम् । वस्तुतस्त्वत्रा ऽयं विवेकः । द्वे, अविद्ये, एकया जीवं प्रतीश्वरस्तद्धर्माश्चाव्रियन्ते, अन्यया जीवपूर्णानन्द आच्छाद्यते, ईश्वरापरोक्षेण प्रथमाया निवृत्तिः, ततो भगवन्महाप्रसादेन द्वितीयाया निवृत्तिः, विमुक्तश्च विमुच्यत इति श्रुतिरविद्याद्वित्वे मानमिति दिक्; ना ऽहं चैत्रो ना ऽहं मैत्र इति जीवभेदप्रत्यक्षम्, न च साक्षिप्रत्यक्षमध्यस्तसाधारणमिति न तेन तात्त्विकभेदसिद्धिः । साक्षिसिद्धे दुःखादौ सन्देहाद्यभावेन तस्य प्रमाणेषु श्रेष्ठत्वमित्युक्तं हि प्राक् । न च जीवो न साक्षी, तस्य कर्तृत्वादिति वाच्यम् । व्यवहर्तव्यदुःखादिभानाय व्यवहर्तुर्जीवस्यैव साक्षित्वौचित्यात् । घटो न ब्रह्म, घटो न पटो ना ऽहं घट इत्यादिपञ्चा ऽपि भेदाः प्रत्यक्षाः, इति भेदपञ्चके प्रत्यक्षम्, जीवेश्वरौ स्वसमसत्ताकपरस्परभेदवन्तौ विरुद्धधर्माधिकरणत्वात् दहनतुहिनवत् ।

न च दुःखादेरन्तःकरणधर्मत्वेन स्वरूपासिद्धिः, यथा हि क्षेत्रवृत्ताद्युत्पन्नधनदण्डादिना पुरुषस्य धनित्वं दण्डित्वं च न क्षेत्रादेस्तथा ऽन्तःकरणोत्पन्नदुःखादेरविद्याहंकृतस्वामित्वसम्बन्धेन जीवे विद्यमानत्वात्, त्वन्मते ऽपि दुःखादेरन्तः करणधर्मत्वे ऽपि व्यावहारिकस्य स्वतो ऽनर्थरूपदुःखात्मकबन्धस्य मोक्षसामानाधिकरण्याय जीवस्थत्वावश्यम्भावाच्च, अन्यथा दुःखादिबन्धो ऽन्तः

Digitization by Arya Samaj Charitable Foundation, Chennai

करणे जीवे च मुक्तिरिति वैयधिकरण्यापत्तेः ।

न च निर्दुःखत्वदुःखित्वयोरवच्छेदकभेदेनोपपत्त्या धर्मिभेदासाधकत्वमिति वाच्यम् । अवच्छेदकेन हि कृत्स्नं ब्रह्मा ऽवच्छिद्यते एकदेशो वा । आद्ये कृत्स्नस्य जीवत्वमीशत्वं वा स्यादिति न तेन भेदसिद्धिः । अन्त्ये सदेशत्वापत्तिः, नित्यस्य सर्वज्ञस्या ऽव्याप्यवृत्तित्वे मानाभावाच्च । अहमज्ञो दुःखीत्यज्ञानाश्रय एव दुःखित्वप्रतीतेः । तस्य चा ऽज्ञानकल्पितत्वेन शुद्धत्वात्, जीवस्तत्त्वतो ब्रह्माभिन्नो न सर्वज्ञत्वाभावात् घटवत् । न च सर्वेतिविशेषणमसिद्धिवारकत्वाद्व्यर्थम् । केवलाभावापेक्षया विशिष्टाभावस्य भिन्नत्वेन वैयर्थ्याभावात् । ब्रह्म जीवधर्मिकप्रतियोगिज्ञानाबाध्यभेदप्रतियोगि, अधिष्ठानत्वात् शुक्तिवत्,

न च यत्किञ्चिदभावप्रतियोगि घटादिज्ञानाबाध्यभेदप्रतियोगित्वेनात्मज्ञानाबाध्यभेदसिद्धिरिति वाच्यम्, यथा हि माता पूज्येत्युक्ते स्वमातुरेव पूज्यत्वं लभ्यते न स्वसुतमातुर्भार्यायाः तथा पक्षे ब्रह्मप्रतियोगिको दृष्टान्ते शुक्तिप्रतियोगिकश्च भेदो लभ्यते, ससम्बन्धित्वात् । ब्रह्म जीवाद् भिन्नम्, दुःखाननुभवितृत्वात् घटवत् । न च सर्वानुभवितरि हेतोरसिद्धिः । स्वनिष्ठतयेश्वरेण दुःखाद्यननुभवितृत्वात् ।

न च दुःखादेरन्तःकरणनिष्ठत्वेन स्वनिष्ठतया जीवे ऽननुभवितृत्वस्य व्यभिचारः । अस्मन्मते ऽन्तःकरणोत्पन्नस्या ऽपि दुःखादेरविद्यासहकृतस्वामित्वसम्बन्धेन जीवे विद्यमानत्वात् । त्वन्मते जपाकुसुमलौहित्यस्य स्फटिकनिष्ठतयेव बुद्धिनिष्ठस्य दुःखादेश्चैतन्यनि-

Digitization by Arya Samaj Charitable Foundation, Chennai

ष्ठतयैवानुभवात्, ब्रह्मजीवप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवत्, दुःखाननुभवितृत्वात्, अभ्रान्तत्वात्, असंसारित्वात्, घटवत्, जीवो वा ब्रह्मप्रतियोगिकतादृग्भेदवान्, असर्वशक्तिकत्वात्, व्यतिरेकेण ब्रह्मवत्, न चोपहितस्य पक्षत्वे तत्समसत्ताकभेदसिद्धौ सिद्धसाधनम्। शोधिततत्त्वंपदार्थस्य पक्षत्वात्। न च तस्य धर्मित्वासिद्धिः। धर्मित्वाभावं प्रति धर्मित्वाधर्मित्वाभ्यां व्याघातात्। न च ब्रह्मणः सर्वनिषेधस्वरूपत्वेना ऽव्याघातः, श्रुत्या निषेधविधानार्थं धर्मधर्मिभावावश्यकत्वात्, न च धर्मिपदेन दृष्टान्तोक्तौ तत्समसत्ताकभेदे सिद्धसाधनम्, पक्षोक्तौ साध्याप्रसिद्धिरिति वाच्यम्, धर्मिशब्दस्य पित्रादिशब्दवत् ससम्बन्धिशब्दत्वेन यत्किञ्चिद्धर्मिसमसत्ताकतया सिद्धसाधनाद्यसम्भवात्, धर्मिशब्दस्थाने समभिव्याहृतपरस्वपदप्रयोगे क्षतिविरहाच्च, न चानुमाने शब्दस्वभावोपन्यासानुपयोगः। परार्थानुमाने न्यायावयवार्थबोधने तस्योपयोगात्।

यत्त्वाश्रमो ब्रूते। सर्वज्ञत्वकिञ्चिज्ज्ञत्वादेरौपाधिकशामत्वावदातत्ववद्व्यवस्थितिरिति, तन्न, औपाधिकभेदे ऽपि योगिनः सर्वशरीरेषु भोगदर्शनात्। उपाधिना कृत्स्नावच्छिन्नत्वे ऽभेदकत्वात्तस्य, अंशेनावच्छेदकत्वे ब्रह्मणः सदेशत्वापत्तेरित्युक्तत्वात्, यदपि तेनोक्तं ब्रह्म जीवप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवदित्यत्र सिद्धसाधनं बुध्युपहितजीवात् संसारिणस्त्वंपदवाच्यात् तत्पदवाच्यस्यासंसारिणो ब्रह्मणः सर्वज्ञत्वादिविशिष्टस्य मया ऽपि भेदाभ्युपगमात्। अभेदानुमाने ऽपि तयोरेव जीवब्रह्मपदाभ्याम्

Digitization by Arya Samaj Charitable Foundation, Chennai

अङ्गीकृतत्वादिति ।

तदपि न । सर्वज्ञत्वविशिष्टे विशेष्यसत्तासमानसत्ताकाभेदसिद्धेस्तवानिष्टत्वात् । विशिष्टयोर्भेदमभ्युपगम्याभेदसाधनस्य व्याहततत्वात्, हेतूच्छित्तिरेवानुकूलतर्कः ।

यदपि तेनोक्तम्, शुद्धचिदात्मन एवाविद्यकबुध्युपहिततया संसारः स्वरूपेण नित्यमुक्तत्वमिति न बन्धमोक्षयोर्वैयधिकरण्यमिति ।

तदपि न रमणीयम् । वास्तवबन्धस्य तवा ऽभावात् कल्पितबन्धरहितस्य नित्यमुक्तस्या ऽवश्यमभ्युपेयत्वात्,

यदप्युक्तं तेनैव । ब्रह्मा ऽब्रह्मप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवत् । स्वसमानसत्ताकजडत्ववत् । तादृशदुःखवत् । दुःखाननुसन्धातृत्वात् । असंसारित्वात् अभ्रान्तत्वात् ज्ञातृत्वात् जीववच्चेत्याभाससाम्यमिति ।

तदपि नैव श्रद्धेयम् । एकमेवाद्वितीयं विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतिभिर्बाधितत्वात् ।

यदपि स एव वक्ति । प्रथमहेतौ दुःखेति व्यर्थं तेन विना ऽपि घटादौ व्याप्तिग्रहसम्भवात् । केवलाभावस्य ब्रह्मण्यसिद्धेः । व्याप्तिग्राहकस्यैव विशेषणस्य सार्थक्यादिति ।

तदप्यापातरमणीयम् । केवलाभावापेक्षया विशिष्टाभावस्यातिरिक्तत्वात् इत्युक्तत्वात् । विशिष्टाभावनिष्ठव्याप्तेरुक्तविशेषणं विना ग्रहस्यासम्भवात् ।

न च विशिष्टो ऽपि हेतुरसिद्धः सर्वज्ञे ब्रह्मणि दुःखानुसन्धातृत्वासम्भवादिति वाच्यम् । दुःखसमानाधिकरणानुसन्धानाभाव-

Digitization by Arya Samaj Charitable Foundation, Chennai

BVBSSMV

स्य हेतुत्वात् । नहि दुःखाधिकरणस्येशत्वे मानमस्ति । न चाऽभ्रान्तत्वादिति हेतुरसिद्धः । मिथ्यावस्तुविषयज्ञानस्य भ्रान्तेः कल्पितप्रपञ्चसाक्षिणि ब्रह्मण्यपि सत्त्वादिति वाच्यम् । सर्वेश्वरस्य भ्रान्तत्वे व्याघातात् । सर्वश्रुतिविरोधाच्च भ्रान्तेर्दोषजन्यत्वनियमाच्च,

न च लाघवाद् ज्ञानाभाव एव हेतुरस्तु स चेशे सिद्ध इति वाच्यम् । भ्रमत्वस्याखण्डधर्मस्य ज्ञानत्वाघटितत्वात् तदवच्छिन्नाभावस्यातिरिक्तत्वाच्च ।

यदपि तेनोक्तम् असंसारित्वं यदिसंसारध्वंसवत्त्वं तदा ब्रह्मण्यसिद्धिः । त्वदभिमतमुक्तजीवेषु व्यभिचारश्च । यदि संसारात्यन्ताभाववत्त्वं तदा मदभिमतजीवस्यारोपितसंसारात्यन्ताभाववत्त्वाद् व्यभिचार इति,

तदप्यशुद्धम् । जीवप्रतियोगिकभेदस्या ऽसाध्यत्वात् , । प्रतियोगिव्यधिकरणसंसारात्यन्ताभाववत्त्वस्य हेतुत्वात् । मोक्षप्रागभावानधिकरणत्वस्या ऽपि हेतुत्वसम्भवाच्च,

यच्चोक्तं तेनैव । जीवपक्षकभेदानुमाने साध्यवैकल्यम् । घटस्य ब्रह्मप्रतियोगिकभेदे मानाभावादिति,

तदप्यरमणीयम् । ब्रह्मप्रतियोगिकस्य घटसत्तासमसत्ताकाभावस्य घटे सत्त्वात्, नहि घटे व्यावहारिको ब्रह्मभेदस्त्वया नोपेयते ।

यद्वा । ब्रह्म तत्त्वतो जीवाभिन्नं नेति साध्यम्, न च ब्रह्मस्वरूपातिरिक्तस्य जीवभेदस्य वास्तवत्वानुपपत्तिः, अनुपपत्तिबीजाभावात्, ब्रह्म स्वज्ञानाबाध्यजीवप्रतियोगिकभेदवत् पदार्थत्वात्,

Digitization by Arya Samaj Charitable Foundation, Chennai

असंसारित्वात्, घटवत्, जीवस्या ऽपि जीवान्तराद् भिन्नत्वात् न व्यभिचारः, न चाभेदश्रुतिविरोधाद् अप्रयोजकत्वम्, अभेदश्रुतीनां त्वन्मते चिन्मात्रपरत्वेना ऽविरोधित्वात्, नहि विशेष्यमात्रविषयकं ज्ञानं विशेषणवैशिष्ट्यज्ञानविरोधि, न वा भेदाभावो ऽभेदः त्वन्मते स्वरूपातिरिक्तः श्रुत्या बोध्यते, अखण्डार्थकत्वहानेः, कर्मज्ञानाद्युपदेशाद्यनुपपत्तिरपि जीवेशभेदे मानम्, अन्यथा ब्रह्मण इव जीवस्या ऽपि तदुपदेशवैयर्थ्यात्,

न चैन्द्रजालिकवत्तदुपपत्तिः, तस्याम्रादीनामापरोक्ष्याभावात्, न चेममाम्रं पश्यन्त्विति व्यवहारानुपपत्तिः, यथाहि शास्त्रोपदेशादिना ज्ञातौषधप्रभावो वैद्यो रोगापरोक्ष्याभावे ऽपि इदमौषधमिमं रोगम् आशु नाशयति पश्यन्त्विति वदति तथैन्द्रजालिको ऽपि ज्ञातौषधादिप्रभाव इमं पश्यन्त्विति वदति अन्यथा स्वमायामोहितः स्यात्।

यत्वाश्रमेण ब्रह्म स्वज्ञानाबाध्येत्यनुमाने अस्वप्रकाशत्वरूपजडत्वरूपोपाधिरुद्भावितः तत्र पदार्थत्वमसंसारित्वं वा। जीवप्रतियोगिकभेदव्यभिचारि जडत्वव्यभिचारित्वादित्युपाधिव्यभिचारेण साध्यव्यभिचारे साध्ये ऽल्पज्ञवृत्तित्वरूपोपाधिरुद्भाव्यते। जडत्वव्यभिचारित्वं जीवभेदव्यभिचारित्वव्यभिचारि। अल्पज्ञवृत्तित्वव्यभिचारित्वात्संमतवदिति व्यभिचारोन्नयनात्, ब्रह्म जीवभेदाभाववत्। जडत्वाभावादिति सत्प्रतिपक्षोन्नायकत्वे चाल्पज्ञत्वस्योपाधित्वात्। जडत्वाभावो जीवाभेदव्यभिचारी अल्पज्ञत्वव्यभिचारित्वादिति व्यभिचारोन्नयनात्। जीवत्वसामानाधिकरण्येन भेदस्य प्रत्यक्षसिद्धावपि तदवच्छेदेनासिद्धत्वान्नसिद्धिः प्रतिबन्धिका। प्रमाणावेद्यत्वरूपं

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वप्रकाशत्वं तुच्छे ऽप्यस्ति, न च प्रकाशविषयत्वं विनैव स्वमहिम्नैव स्वसत्ताप्रकारकसंशयाद्यगोचरत्वं स्वप्रकाशत्वमिति वाच्यम्, प्रकाशविषयत्वं विनोक्तसंशयाद्यविषयत्वासिद्धेः, अत्र अयं पुरुषः स्वयं ज्योतिरित्यादिश्रुत्या ऽऽत्मनः स्वविषयत्वोक्तेः। जीवगतो ब्रह्मभेदः, स्वप्रतियोगिज्ञानाबाध्यः, ज्ञातसत्ताकत्वे सति भेदत्वात् पटे घटप्रतियोगिकभेदवदित्याद्यप्यनुमानं मानम्, स्वप्रतियोगिज्ञानाबाध्यपदस्य सर्वनामत्वात् समभिव्याहृतपरत्वमिति न स्वत्वाननुगमो दोषायेत्यादिकं पूर्वोक्तं न विस्मरणीयमित्युपरम्यते।

ननु भेदाधिकरणं दुर्निरूपं। न च यत्र प्रतीयते तदेवाधिकरणम्, सुषुप्तौ प्रतीत्यभावेन विश्वभेदविलयापत्तेरितिचेन्न, परेशस्यैव सर्वज्ञस्य तदानीं भेदधीसत्त्वात्। न च चन्द्रे ऽपि कदा चित् चन्द्रभेदधीसत्त्वात् तत्रा ऽपि तत्सिध्यापत्तिः, स्यादेव हि यदि चन्द्रैक्यधीः परीक्षिता बाधिका न स्यात्।

किञ्च घटादिकं क्व वर्तत इत्यादि चोद्यापत्तिः, न च मृषावादिनो ममानुपपत्तिरलंकारः, सत्यत्ववादिनो ऽप्यनुपपन्नस्या ऽचिन्त्यशक्त्योपपत्त्या ऽनुपपत्तेरलंकारत्वात्।

न च मृषाभूतस्य स्वाप्नैन्द्रजालिकादिपदार्थस्या ऽघटना दृष्टा न सत्यस्येति वाच्यम्, सत्यस्यैवहि निद्रामन्त्रौषधादेस्तादृशधीजनकत्वसामर्थ्यं, प्रसिद्धं हि एकशताधिकषोडशसहस्राणां विवाहे एकस्मिन् काले वासुदेवादीनां तावत्त्वं बोधादिश्चेति हरिसामर्थ्यस्याघटघटनापटीयस्त्वम्। आत्मनि चैवं विचित्राश्च हीति सूत्रात्।

यच्चाश्रमेणोक्तम्। ब्रह्मणि स्वप्रकाशाविरुद्धानादिभावरूपज्ञा-

Digitization by Arya Samaj Charitable Foundation, Chennai

नारव्यविवेकाग्रहाद् भेदादिभ्रमोपपत्तिरिति, तन्न ब्रह्मणः तव सदा षडिन्द्रियवेद्यत्वे भ्रमानुपपत्तेः । अधिकस्य वेदान्तवृत्तावप्यभानात्, सर्वप्रत्ययवेद्ये परे ब्रह्मणि व्यवस्थित इति त्वदीयोक्तेः ।

यदपि तेनोक्तम् । मुक्त्यन्वयि जीवस्वरूपं ब्रह्मा ऽभिन्नम् । चेतनत्वात् ब्रह्मवत् चेतनत्वं च ज्ञातृत्वम् । तच्च सर्वज्ञे ब्रह्मणि जीवे च नासिद्धमिति ।

तदपि न । चेतनत्वं ब्रह्माभेदव्यभिचारि जगत्कर्तृत्वादि–व्यभिचारित्वादिति व्यभिचारोन्नायकस्य जगत्कर्तृत्वादेरुपाधित्वात् । न च प्रकाशत्वं हेतुः । तव निर्विशेषवादिनो हेतोरभावात् ।

किञ्च पक्षदृष्टान्तयो–र्भेदे बाधो ऽभेदे च दृष्टान्तासिद्धिः न च कल्पितभेदेन दृष्टान्तोपपत्तिः, एतदनुमानात् पूर्वं भेदस्य कल्पितत्वासिद्धेः, न चाबाधितचेतननानात्वकल्पने गौरवम् । जीवनानात्वमुपेत्य तस्य दोषाधीनत्वस्य तत्प्रतीतेर्भ्रमत्वस्य तद्ध्वंसत्वस्य स्वीकारे तवैव गौरवात् ।

यच्चोक्तं तेनैव, जीवो ब्रह्मणि स्वसत्ताविरोध्यत्यन्ताभावप्रतियोगी, ब्रह्मातिरिक्तानधिकरणकात्यन्ताभावप्रतियोगिभेदप्रतियोगी ब्रह्मनिष्ठात्यन्ताभावप्रतियोगिभेदप्रतियोगी, स्वस्यासंसार्यभेदाविरोधिभेदप्रतियोगी ब्रह्मनिष्ठभेदप्रतियोगी न भवतीवा ऽपदार्थत्वात् चैतन्याभाववन्मात्रवृत्तिधर्मानधिकरणत्वाद्वा ब्रह्मवदिति,

तन्न सुन्दरम् । व्यभिचारोन्नायकस्य सर्वसर्वज्ञत्वादेरुपाधित्वात् आद्यस्य प्रातिभासिकादौ व्यभिचाराच्च प्रातीतिकाभेदे ब्रह्मणः प्रातीतिकत्वाद्यापत्तेः । जीवब्रह्मानुगतस्योक्तानधिकरणत्वस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

निर्विशेषवादे ऽभावाच्च संसारिणो भेदस्य ब्रह्मणि मृषात्वे ब्रह्मणो ऽपि संसारित्वाद्यापत्तेश्च,

यत्तु जीवो जीवत्वे सति ब्रह्मप्रतियोगिकभेदवान् न भवति पदार्थत्वात् घटवदिति, तन्न, जीवत्वविशिष्टब्रह्मप्रतियोगिकभेदस्य जीवे प्रसिद्धौ बाधात्, अप्रसिद्धौ च प्रतियोग्यप्रसिद्ध्या ऽभावरूपसाध्याप्रसिद्धेः, न च जीवे कल्पितभेदमादायोपपत्तिः एतदनुमानात् पूर्वं भेदस्य कल्पितत्वासिद्धेः, प्रपञ्चो जडत्वे सति भेदप्रतियोगिकभेदवान् न भवति पदार्थत्वात् जीववदिति आभाससाम्याच्च न च वास्तवभेदनिषेधे सिद्धसाधनम् । कल्पितभेदनिषेधे च प्रत्यक्षादिबाध इति वाच्यम् । जडाद्वास्तवभेदाभावे ब्रह्मणो जडत्वापत्तेस्तवा ऽनिष्टत्वात् । प्रत्यक्षबाधस्य प्रकृते ऽपि समत्वात्, न च तस्या ऽबाधिताभेदविरोधित्वम् एतदनुमानात् प्राक् प्रत्यक्षस्य व्यावहारिकभेदविषयकत्वासिद्धेः, ।

न च रूप्यवत्यपि शुक्त्यादौ तन्निषेधवज्जीव एव प्रसिद्धस्य विशिष्टभेदस्य निषेध इति वाच्यम् । रूप्यस्य तत्रासत्त्वात् अनिर्वाच्यवादे धीकाले विद्यमानस्य रूप्यादेः स्वरूपेण निषेधासम्भवाच्च, परीक्षितप्रत्यक्षेणैव बाधात् । जीवो ब्रह्मप्रतियोगिककल्पितभेदाभाववान् असर्वज्ञत्वात् घटवदित्यनुमानाद्वा, चेतनत्वं जीवत्वावच्छिन्नप्रतियोगिताकधर्मिज्ञानाबाध्यभेदवद्वृत्ति सर्वचेतनवृत्तित्वात् चेतनावृत्तिरहितत्वाद्वा वाच्यत्ववत्,

न चान्त्यहेतौ जीवत्वे व्यभिचारः । तत्र जीवप्रतियोगिकधर्मिज्ञानाबाध्यभेदवद्वृत्तित्वस्यैव साध्यत्वात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

न च जडवृत्तित्वमुपाधिः पक्षेतरतुल्यत्वात् । न च शुद्धं चैतन्यमनुमानागम्यं गम्यं तूपहितं तद्भेद इष्टापत्तिः तत्र त्वदीयैक्यानुमानानुपन्यासापत्तेः ।

न च तस्य भेदे तात्त्विकभ्रमनिरासकत्वमात्रं फलम् । तद्धर्मिकैक्यबोधं विना तद्धर्मिकजीवादिप्रतियोगिकभेदस्य तात्त्विकत्वभ्रमनिरासासम्भवात् ।

व्यभिचारादिशून्यत्वाद् अन्यथानुपपत्तितः । सर्वशक्त्यल्पशक्त्यादेर्भेदे वै तन्त्रता दृढा ।

जीवब्रह्मणोर्भेदे अनुमानानि । जीवानामन्योन्यभेदे तु चैत्रः मैत्रप्रतियोगिकधर्मिज्ञानाबाध्यभेदवान् । मैत्रानुसंहितदुःखाननुसन्धातृत्वात् घटवदित्यनुमानं मानम् ।

यत्तु चैत्रशब्दाभिधेयदेहविशिष्टात्मज्ञानाबाध्यो मैत्रादिभेद इति सिद्धसाधनमित्याश्रमोक्तम् । तन्न । विशेष्यस्यैव धर्मिपदेनोक्तत्वात् । स तु त्वन्मते शुद्धचिदानन्दरूप इति तव भेदस्य तज्ज्ञानाबाध्यत्वान्न सिद्धसाधनम् । इह च दहनतुहिनादौ लक्षतया ऽनुसन्धानाननुसन्धानत्वरूपविरुद्धधर्मयोरेव प्रयोजकत्वात् । विमतं सुरभि धूमरहितं चन्दनप्रभव–वह्नि–रहितत्वात् इत्यादाविवासिद्धिवारकविशेषणत्वं न दोषः, एवं चैत्रो मैत्रप्रतियोगिकतात्त्विकाभेदवान् न, मैत्रीयस्मृतिहेत्वनुभवरहितत्वान् मैत्रीयभ्रान्तिनिवर्तकज्ञानरहितत्वान् मैत्रस्मृतसर्वास्मृतित्वान् मैत्रानुभूतसर्वाननुभवितृत्वाच्च घटवत् । विमतो बन्धध्वंसः स्वप्रतियोगितावच्छेदकावच्छिन्नाधारप्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवन्निष्ठः बन्धध्वंसत्वात् संमतवत् , जीवः संसारी

Digitization by Arya Samaj Charitable Foundation, Chennai

वा संसारध्वंसाधारो वा स्वज्ञानाबाध्यजीवप्रतियोगिकभेदवान् स्वज्ञानाबाध्यसंसारिप्रतियोगिकभेदवान् वा स्वज्ञानाबाध्यसंसारध्वंसाधिकरणप्रतियोगिकभेदवान् वा, पदार्थत्वात् घटवत् विपक्षे बाधकस्य वक्ष्यमाणस्य सत्त्वात् नाऽऽभाससाम्यम् आत्मभेदमात्रे तु आत्मा आत्मप्रतियोगिकस्वज्ञानाबाध्यभेदवान् पदार्थत्वात् घटवत् विमतः आनन्दः स्वनिष्ठदुःखविरोधित्वव्याप्यधर्मेण स्वजातीयप्रतियोगिकस्वज्ञानाबाध्यभेदवान् । दुःखविरोधित्वात् दुःखाभाववत् । आत्मवैभवपक्षे आकाश आत्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदाधारविशेषगुणवत् विभुव्यतिरिक्तद्रव्यत्वात् पृथिवीवत् इत्याद्यपि द्रष्टव्यम् ।

केचित्तु । पृथिवीत्वं जलत्वतेजस्त्ववायुत्वमनस्त्वेतरद्रव्यत्वसाक्षाद्व्याप्यजातिभिन्नं मेयत्वत् जलत्ववत् गगनत्वजातिवादिनं प्रति गगनत्वेतरेत्यपि विशेषणीयम् न चोक्तजातिमत्पदार्थान्तरसिध्याऽर्थान्तरम् लाघवेन क्लृप्ते धर्मिणि धर्ममात्रेणाऽनुमानपर्यवसानात् । सत्ता द्रव्यत्वान्यात्मनिष्ठजात्यन्या द्रव्यत्वं वा सत्तान्यात्मनिष्ठजात्यन्यत् मेयत्वात् घटवत् । आत्माणुत्वमते आत्मा द्रव्यत्वव्याप्यजातिमान् अविभुद्रव्यत्वात् पृथिवीवत् इत्यादिभिरात्मत्वजातिसिद्धौ तात्त्विकात्मभेदसिद्धिः, जातेर्धर्मिज्ञानाबाध्यभेदं विना ऽयोगात् अन्यथा व्यक्त्यभेदः क्वापि दोषो न स्यात्, विपक्षे आत्मत्वस्य जातित्वे लाघवम् औपाधिकत्वे तस्योपाधिज्ञानाधीनत्वे गौरवं बाधकम् । आकाशादिकं तु धर्मिग्राहकमानेनैकतया सिद्धमिति नाकाशत्वादिकं जातिरित्याहुः । जीवभेदानुमानानि । यदि चेतनैक्यं स्यात् चैत्रादेर्भोगसाङ्कर्यं स्यात् । हस्तपादादिभेदे ऽनुसन्धानदर्श-

Digitization by Arya Samaj Charitable Foundation, Chennai

नेनौपाधिकभेदो ऽपि न नियामकः। ना ऽपि विश्लिष्टोपाधिभेदस्तत्र तन्त्रम् । मातृसुखादेर्गर्भस्थेनानुसन्धानापातात् ।

उद्यतायुधदोर्दण्डाः पतितस्वशिरोक्षिभिः । पश्यतः पातयन्ति स्म कबन्धा अप्यरीन् युधि इति भारतोक्ते विश्लिष्टे ऽप्यनुसन्धानदृष्टेश्च, नाप्यतीतादिशरीरेष्विव शरीरभेदस्तत्र तन्त्रम् । तद्भेदे ऽपि बाल्ये ऽहं दुःखीत्यनुसन्धानस्य जातिस्मरस्य च जन्मान्तरे ऽहं दुःखीत्यनुसन्धानस्य योगिनश्च नानादेहभोगानुसन्धानस्य च दर्शनात्, न च वयं सर्वदा वर्तमानतया ऽनुभवं स्मरणं वा ब्रूमः, किन्नाम कदा चित् स्वीयतया ऽनुभवमात्रं न च तन्नास्त्यतीते सुखादौ, न चान्तःकरणरूपोपाधिभेदो ऽविद्याभेदो वा नियामकः। चैतन्यैक्ये ऽपि चक्षुरादिभेदवदन्तःकरणभेदस्याप्यननुसन्धानाप्रयोजकत्वात् न चान्तःकरणभेदेन तददर्शने ऽप्यात्मैक्याध्यासापन्नान्तःकरणभेदस्याननुसन्धानप्रयोजकत्वं कल्प्यते । स्वप्रकाशे निर्विशेषे ज्ञाताज्ञातविभागहीने ऽविद्यादेस्तादात्म्यारोपासम्भवात् अविद्यारोपं प्रति अविद्यान्तरं हेतुरित्यनवस्थाद्यापत्तेश्च, प्रत्यहं सुषुप्तावन्तःकरणविलयेन पूर्वदिनानुभूतस्या ऽनुसन्धानापत्तेश्च । न च संस्कारात्मना ऽवस्थितस्यैव पुनरुद्बोधेन तत्रा ऽन्तःकरणभेदो नास्तीति वाच्यम् । संस्काररूपेण स्थितस्यानुभवस्मृत्याद्यनुपयुक्तत्वात् अन्यथा सुषुप्तावप्यन्तःकरणवृत्त्युत्पत्तिः स्यात्, एतेन सुषुप्तावन्तःकरणं विलीनघृतवदस्त्येव पिण्डीभूतान्तःकरणस्यैवाहंधीविषयत्वात् द्रवीभूतान्तः करणसत्त्वे ऽपि विशेषविज्ञानाभावात् सुषुप्तिरित्याश्रमोक्तं निरस्तम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्चान्तःकरणस्य व्यवस्थापकत्वे मोक्षे तदभावात् मुक्तामुक्तव्यवस्था न स्यात् ईषत्कालबहुकालसुप्तानामनुभवसाङ्कर्यापत्तेः भेदकस्यान्तकरणस्य तदानीमभावात् कायव्यूहवतो ऽन्तःकरणभेदे ऽप्यनुसन्धानदर्शनाच्च न च तेषामीशकल्पानां योगप्रभावेण तदुपपत्तिः । ईश्वरादेरस्मदादिसुखाद्यापरोक्षे ऽप्यहं सुखीति स्वनिष्ठतया तदनुभवाभावस्योक्तत्वात् । न च योगिनामन्तःकरणं योगप्रभावाद्वैपुल्यं प्राप्तं सर्वदेहावच्छिन्नभोगहेतुरिति वाच्यम् । बहिःकरणभेदे चान्तःकरणाभेदे मानाभावात् । पूर्वान्तःकरणनाशाद्विपुलस्योत्पत्त्या कृतहानाकृताभ्यागमप्रसङ्गाच्च । प्रदीपवदावेशस्तथा दर्शयतीत्यधिकरणे त्वद्भाष्ये कायव्यूहे प्रतिदेहमन्तःकरणभेदोपगमाच्च, अवच्छेदकनाशादवच्छिन्ननाशाज्जीवनाशापत्तेश्च । न चैकमेव चैतन्यं सर्वान्तःकरणैरवच्छिद्यत इति न दोषः व्यवस्थोच्छेदापत्तेः,

यत्तु अननुसन्धाने आत्मभेदो न प्रयोजको ऽभेदो ऽपिजन्मान्तरीयसुखाद्यननुसन्धानादिति दीपिकाकृतोक्तम् ,

तदशुद्धम् । संस्कारानुद्बुद्धत्वान्नाशाद्वा तदुद्बोधे तु जातिस्मृतेरिष्टत्वात् यदपि तदाश्रयाभेदाज्ञानमेवाननुसन्धाने प्रयोजकम् । योगिनां जातिस्मृतिमतां च देशान्तरीयकालान्तरीयसुखाद्याश्रयाभेदाज्ञानाभावादनुसन्धानम् । चैत्रस्य मैत्रात्माभेदाज्ञानान्न तदीयसुखाद्यनुसन्धानमनुभवो वेति तेनोक्तम् तदपि मन्दम् । ईश्वरस्य श्रुतिसिद्धसर्वज्ञत्वस्य जीवन्मुक्तस्य शुकादेश्चास्मदादिदुःखस्या ऽहं दुःखीत्यनुभवाद्यापत्तेरस्मदाद्यन्तःकरणस्या ऽपि त्वन्मते तदी-

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्वात् । इष्टापत्तौ जीवन्मुक्तनिर्दुःखसर्वेश्वरप्रतिपादकश्रुतिर्दत्ताञ्जलिः स्यात् किञ्च अनेकाविद्यासम्बन्धस्य दुःखानुसन्धातृ तदेवमैत्रीयदुःखानुसन्धात्रिति साङ्कर्यतादवस्थ्यम्, न चाविद्यात्मकबन्धनिवृत्त्यात्मकमोक्षस्य शुद्धगतत्वे ऽपि दुःखाद्यनुसन्धातृत्वस्योपहितगतत्वात् न शुद्धे भेदापादकत्वम्, दुःखानुसन्धानरूपस्यानर्थस्योपहितनिष्ठत्वेन बन्धमोक्षयोर्वैयधिकरण्यतादवस्थ्यात् । बद्धस्म निवृत्तिरेव न तु मोक्ष इत्यापत्तेश्च । न चोपाधेः कल्पितत्वेन निवृत्तावप्युपधेयस्या ऽकल्पिततया निवृत्त्ययोगान्मोक्षान्वयित्वम्, विशिष्टस्य शुद्धभिन्नतया त्वदभिमतस्य मृषात्वेन मोक्षान्वयासम्भवात् । तस्य सत्यत्वे तत्र दृश्यत्वादे–र्व्यभिचारापत्तेः । न च दुःखानुसन्धानस्योपहितनिष्ठत्वे ऽपि अविद्यारूपो बन्धः शुद्धगतः तत्रैव च मोक्ष इति तयोरवैयधिकरण्यम् । अविद्याया दुःखाद्यनुभवद्वारैवानर्थत्वात् । यत्र दुःखानुसन्धानं स एव बद्धस्तस्यैव मोक्षौचित्यात् । न चाविद्यावच्छिन्नद्वारा ऽवस्थात्रयातीते शुद्धे ऽप्यनुसन्धानमिष्टम् । दुःखानुसन्धातुरवस्थात्रयातीतत्वासम्भवात् । किञ्चोपाधेः शुद्धगतत्वे किमेकैकोपाध्यपगमो मुक्तिः उत सर्वोपाध्यपगमः । नाद्यः सदा मुक्तिरेव न तु बन्ध इत्यापातात् नान्त्यः अधुना बन्ध एव न कस्या ऽपि मुक्तिरित्यापातात् । न च येनोपाधिना यच्चैतन्यस्य परिच्छिन्नत्वं तस्मिन् चैतन्ये तदुपाध्यपगम एव मोक्ष इति नानाजीववादे प्रथमकल्पो निर्दुष्टः । एकोपाधिमुक्तस्या ऽपि शुद्धस्योपाध्यन्तरेणावच्छिन्नत्वेन मुक्तेरसम्भवात् । नहि भग्नोपाधिचैतन्यं उपाध्यन्तरोपहिताद्भिन्नम् । न च एकजीववादे सर्वोपाध्यपगमो मोक्षः । शुकादिबोधकमुक्तिशा-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्वस्याप्रामाण्यापत्त्या तन्मतस्याप्रामाणिकत्वात्। दुःखाद्यनुसन्धानस्य व्यवस्थापकत्वाच्च। किञ्चोपाधिरेकदेशेन सम्बध्यते कृत्स्नेन वा। आद्ये त्वन्मते स्वाभाविकांशाभावेनौपाधिकत्वं वाच्यम् तथाचानवस्था। अन्त्ये न भेदकता। कृत्स्नस्यैकोपाधिनैव ग्रस्तत्वात्। गगनादावपि स्वाभाविकांशाभावेन घटाद्युपाधिसंम्बन्धो न स्यादेव। तदुक्तम्।

न चेदुपाधिसंबन्ध एकदेशे ऽथ सर्वगः। एकदेशे ऽनवस्था स्यात् सर्वगश्चेन्न भेदकः इति। न च सर्वविकल्पासहत्वेन मिथ्याभूतस्यैवोपाधेर्मिथ्याभेदप्रयोजकत्वम्। उत्तरास्फूर्तौ प्रधानसंवृत्योर्विकल्पाद्यसहत्वमिति सांख्यबौद्धाभ्यामपि वक्तव्यत्वेन तन्निरासासम्भवात्। मृषाभूतस्या ऽपि व्यावहारिकस्य त्वया व्यवस्थास्वीकारात्। अन्यथा जीवजडयोर्विश्वकर्तृत्वान्तर्यामित्वादिकं निरस्येश्वरे तत्समर्थयतस्तव समन्वयाध्यायस्योच्छेदः स्यात्। नहि तव वास्तवं कर्तृत्वमीशे ऽस्ति। अथ बद्धमुक्तदुःखाद्यनुसन्धानाननुसंधानानुपपत्त्या चितां वास्तवभेदः सिद्धः। भेदे ऽनुकूलतर्काः।

ननु स्याद् बद्धमुक्तादिव्यवस्थार्थं वास्तवो भेदो यदि जीवनानात्वं स्यात् तदेव तु न। तस्यैकत्वात् बन्धमोक्षगुरुशिष्यादिव्यवस्थायाः स्वप्नवद्यावदविद्यमुपपत्तिरिति चेन्न, तस्मिन्नेकस्मिन् सुप्ते सर्वजगदप्रतीत्यापत्तेः न च सर्वाभिमानी मुख्यो न सुप्तः। सृष्टिमारभ्याप्रलयमसुप्तत्वस्य जीवे ऽसम्भवात्। किञ्च ब्रह्मण एव जीवत्वे तस्यैव बन्धमोक्षाविति तस्य नित्यमुक्तत्वश्रुतिविरोधः स्यात्। न च मुक्तेः स्वरूपत्वेन बन्धस्य चाविद्यकत्वेन तदविरोधः, नहि मृगतृष्णा—

Digitization by Arya Samaj Charitable Foundation, Chennai

कल्पितोदकेन स्वभावशुष्का मरूभूमिरार्द्रीभवति इति वाच्यम् , वास्तवबन्धस्य त्वन्मतेऽभावेन ब्रह्मज्ञानोच्छेत्तव्येन कल्पितबन्धेनास्पृष्टस्य चैतन्यस्याभावेन नित्यमुक्तबोधकश्रुतिनिरर्थत्वानुद्धारात् । बन्धस्य मायिकत्वे सर्वज्ञस्य तद्दर्शनासम्भवेन तदुच्छेदायोपदेष्टृत्वासम्भवात् । तमेव प्रति प्रत्यक्त्वपराक्त्वयोरयोगाच्च । न हि मैत्रं प्रति त्वमितिधीविषयस्य चैत्रस्य तमेव प्रत्यहमिति धीविषयत्वम् । न च भिन्नान्तःकरणाभेदाध्यासेन तत्तदन्तःकरणमादाय प्रत्यक्त्वपराक्त्वमहन्त्वमित्यादिबुद्धिविषयत्वव्यवस्थोपपत्तिः । योगिनः कायव्यूहे नानान्तःकरणतादात्म्यारोपेऽप्यहमित्येव सर्वत्र प्रतीतेः । तदन्तःकरणस्यैकत्वे बाह्यकरणानामप्यैक्यापत्त्या कायव्यूहस्यैवाभावापत्तेः । निर्विशेषे स्वप्रकाशेऽन्तःकरणादितादात्म्यारोपासम्भवाच्च । चैत्रस्य शुक्तिसाक्षात्कारेण रूप्यभ्रमनिवृत्तावप्यन्येषामपि तन्निवृत्त्यापत्तेश्च ।

नचान्तःकरणभेदेन व्यवस्थोपपत्तिः । अन्तःकरणस्य जीवानुपाधेरव्यवस्थापकत्वात् । अन्यथा योगिनः काव्यूहे देहोऽपि भोगभेदकः स्यात् तथा च एक एव नित्यशुद्धबुद्धमुक्तस्वभाव उपनिषन्मात्रगम्यो वस्तुतोऽस्ति । स एवाज्ञानमाश्रित्य जीवभावं लब्ध्वा देवतिर्यङ्मनुष्यादिदेहान् परिकल्प्य तदुपकरणत्वेन ब्रह्माण्डादिचतुर्दशभुवनं सृष्ट्वा तेषु तेषु देहेषु कश्चिद्देवः कश्चिन्मनुष्यः कश्चिदन्यः कश्चिद्धिरण्यगर्भः सर्वेषां स्रष्टा कश्चिद्विष्णुः पालकः कश्चिदन्यः सर्वसंहारकर्ता रुद्रः प्रलये तेषामुपाधयः सत्त्वादिगुणाः तद्वशात् तेषां सर्वं सामर्थ्यम् अहं पुनः कश्चिद् ब्राह्मण-

Digitization by Arya Samaj Charitable Foundation, Chennai

कुमारः तेषां भक्तिपूजानमस्कारादीननुष्ठाय श्रवणादिसाधनं सम्पाद्य मोक्षं साधयिष्यामि ईश्वरोऽपि सन् भ्रान्तो भवति । जागरे पुनर्यथोक्तजागरप्रपञ्चमुपसंहृत्य स्वप्ने निद्रादोषसहकृतः तादृशमेव प्रपञ्चं परिकल्प्य तत्तद्देहेन्द्रियानासाद्य भोगान् भुक्त्वा वसिष्ठादयो मुक्ताः । अन्ये बद्धाः । अहमपि कश्चित् बद्धो दुःखी संसारी मुक्तो भविष्यामि इति कल्पयित्वा पुनस्तामेवावस्थामुपसंहृत्य जागरं सुषुप्तिं वा सर्वभ्रमनिवृत्तिरूपां प्राप्नोतीति । एवं सत्येक एवात्मा स्वयंप्रकाशानन्दैकस्वभावः । स्वाज्ञानवशात् जीवः संसारीत्यादिशब्दाभिधेयो भवति न तदन्यः कश्चित् संसारीति संभावयितुमपि शक्यमिति स्थितम् । तस्यैवानादिसंसारसञ्चितपुण्यनिचयक्षपितकल्मषस्य वैराग्यादिसंपन्नस्य शास्त्राचार्यप्रसादासादितः आदरनैरन्तर्यदीर्घकालादिसेवितश्रवणमननादिसाधनपाटवस्य यदा तत्त्वमस्यादिवाक्योत्थसाक्षात्कार उदयमासादयति तदा ऽज्ञानं तत्कार्यं सर्वमुपसंहृत्य स्वानन्दतृप्तः स्वे महिम्नि स्थितो मुक्त इति व्यवहारभाग् भवति, तस्यामवस्थायां न तदन्यः कश्चित् संसारी तेन नानुभूयमानं द्वैतं वा किञ्चिदस्ति इति कस्य चिद् गौडस्य प्रलापो निरस्तो वेदितव्यः । शुद्धचैतन्यस्य जागराद्यवस्थाया असंभवात् । तस्यैव जीवभावत्वे मुक्तत्वसंसारित्वविरुद्धरूपवत्त्वप्रसंगात् समग्रस्य जीवोपाधिना ग्रस्तत्वे सर्वस्य जीवत्वापत्तेश्च । यः सर्वविदित्यादिश्रुतेर्निर्विषयत्वापत्तेश्च । इश्वरोपाधिना ग्रस्तत्वे सर्वस्य सर्वज्ञत्वापत्तेश्च ।

किञ्च श्रुतिषु अविद्यायामन्तरे वर्तमाना इत्यविद्यासंबन्धः, अविद्यारमणीयचरणा इत्यादौ कर्मसंबन्धः सति संपद्य न विदुरित्यादौ

Digitization by Arya Samaj Charitable Foundation, Chennai

सुषुप्तिः वेदान्तविज्ञानसुनिश्चितार्था इत्यादौ तत्त्वज्ञानं परामृतात्परिमुच्यन्ति सर्व इत्यादौ मुक्तिश्च चेतनधर्मः कथमनेकेषु उच्येत । अनादिमायया सुप्तो यदा जीवः प्रबुध्यते इत्येकवचनं तु नीतिपरो राजा भवेत् स्वर्गकामो यजेतेत्यादिवत् जात्यभिप्रायेणोपपन्नम् । न च विभिन्नान्तःकरणाभेदारोपात् प्राप्तस्य बहुत्वस्यानुवादिका उक्तश्रुतयः । मुक्तिसुषुप्त्यादावन्तः करणारोपाभावात् । न च जीवबहुत्वस्य प्राप्तत्वेन मुक्त्यंश एवाप्राप्तत्वपर्यवसानम् । स्वरूपात्मिकाया मुक्तेः त्वन्मते नित्यप्राप्तत्वात् ।

यत्तु दीपिकाकृतोक्तम् । यथा ह्ययं ज्योतिरात्मा विवस्वान् यो भिन्नो बहुधैको ऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा स वा एव भूतानीद्रियाणि विराजं देवताः कोशांश्च प्रविश्य प्रविश्य मूढो मूढ इव व्यवहरन्नास्ते माययैव तस्मादद्वय एवायमात्मेति श्रुतिर्जीवपरयोरभेदपरेति । तन्न सम्यक् अन्तर्यामितयेशबहुत्वपरत्वात् सृष्ट्यनन्तरं तस्यैव प्रवेशसंभवात् । समाधिकशून्यो मायया स्वेच्छया स्वसृष्टं प्रविश्यामूढः सर्वज्ञो ऽपि मूढो जीवो यथा देहादौ व्यवहरति तथा ऽयमन्तस्थ इत्यर्थः ॥

बहवो ज्ञानतपसा पूता मद्भावमागताः । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । ये च मुक्ता भवन्तीह नरा भरतसत्तम । तेषां लक्षणमेतद्यत् श्वेतद्वीपनिवासिनाम् । ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा । विशन्ति विप्रप्रवराः सांख्या भागवतैः सह इत्यादिस्मृतिभिः मुक्तिप्राप्तेः बहुकर्तृकत्वविधानात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्चैकस्यैव जीवस्य सर्वकल्पकत्वे जीवस्य कारणत्वं निषेध्ये-श्वरकारणत्वबोधकैः श्रुत्यादिभिर्विरोधः स्यात् । सर्वज्ञत्वादिबोधक-श्रुतीनां निर्विषयत्वं स्यात् । जीवभिन्नेशाभावात् जीवे सार्वज्ञ्यस्या ऽनुभवबाधितत्वात् । न च समष्ट्यभिमानिनो जीवस्य सार्व-ज्ञ्यादिकं स्वीक्रियते । लोके जीवत्वेन प्रसिद्धेषु सार्वज्ञ्यादेः प्रत्यक्षा-दिना बाधितत्वात् । प्रसिद्धभिन्नसर्वज्ञस्वीकारे त्वस्मदिष्टसिद्धेः । न चान्तः करणाभेदाध्यासात्तदनुभवविपरीतानुभवयोरुपपत्तिः । सर्व-ज्ञस्याधिष्ठानतत्त्वं जानतः तदध्यासासंभवात् । भ्रान्तिसार्वज्ञ्ययो-रेकत्र व्याहतत्वाच्च । तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप इति स्मृत्या जीवानभिमानिनः सार्वज्ञ्योक्तेः । आचार्यवान् पुरुषो वेदेति श्रुतेरुपदेशं विना जीवस्य तत्त्वज्ञानं ह्यनुपपन्नम् । उपदेष्टव्या-दन्यस्य चैतन्यस्याभावात् । न च सत इवोपदेष्टुः कल्पितस्य उप. देष्टृत्वसंभवः न ह्युपदेष्टृत्वं कल्पितमात्रस्य किन्तु तत्त्ववित्त्वेन कल्पि-तस्य तथा चोपदेशात् प्राक् तत्त्वज्ञाने तदैव मोक्षापत्तिरुपदेशवैयर्थ्यं च । न च स्वप्नवदुपपत्तिः स्वप्ने शब्दविशेषवक्तृत्वेनैव गुरु-कल्पनात् । तत्त्ववित्त्वेनाकल्पनाच्च । न चा ऽत्रा ऽपि वाक्यविशेष-वक्तृत्वेनैव गुरुः कल्प्यते यदेव भगवान् वेद तदेव मे ब्रूही-त्यादिश्रुतेः । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः इत्यादिस्मृतेश्च विरोधापत्तेः । न च सामान्यतो मोक्षोपयोगिज्ञान-विषयवित्त्वेना ऽऽज्ञाततत्त्वेन तत्त्वमस्यादिवाक्यवक्तृत्वेन वा कल्पित-स्योपदेष्टृत्वं युक्तम् । अन्यथा तवा ऽपि मते तत्त्ववित्त्वेन प्रथित ए-वाचार्यो ऽनुसर्तव्य इति प्रथमत एव तत्त्वज्ञाने उपदेशवैयर्थ्यमिति

Digitization by Arya Samaj Charitable Foundation, Chennai

वाच्यम् । सामान्यतो मोक्षोपयोगिज्ञानवत्त्वेन कल्पितस्य विशेषतो ज्ञानाभावेनोपदेष्टृत्वासम्भवात् । अस्मन्मते सामान्यतो मोक्षोपयोगिज्ञानवत्त्वेन प्रमितस्य गुरोः शिष्याज्ञातस्य विशेषज्ञानवत्त्वसम्भवेनोपदेऽष्टृत्वसम्भवात् शिष्येण गुरौ सार्वज्ञ्यारोपे गुरोर्वास्तवसार्वज्ञ्याभावेनोपदेशे प्रवृत्त्यनुपपत्तेश्च । मोक्षस्या ऽपि स्वाप्नमोक्षवन् मृषात्वापत्तेश्च । शिष्यं स्वाज्ञानकल्पितं कल्पकं वा जानतो गुरोरुपदेशे प्रवृत्त्यनुपपत्तेश्च । स्वप्ने तु तथा ऽज्ञानादुपदेशे प्रवृत्त्युपपत्तेः ।

किञ्च । कल्पको निश्चिताद्वैतश्चेत् । शास्त्रप्रणयनवैयर्थ्यम् । तदनिश्चये शास्त्रं प्रमामूलकं न स्यात् । न च शास्त्रस्य प्रमामूलकत्वाभावे ऽपि अबाधितविषयकत्वेन प्रामाण्योपपत्तिः । पौरुषेयवाक्यस्य प्रमामूलकत्वाभावे ऽबाधितार्थकत्वासम्भवात् । सो ऽमुक इति निश्चयाभावेन बह्वायाससाध्यमोक्षार्थप्रवृत्त्यनुपपत्तेश्च । न च शुद्धचित एकत्वेन वस्तुतो ऽसंसारित्वे ऽप्यावरणविक्षेपशक्तिद्वयशालिस्वाश्रिताविद्यावशात् संसारित्वकल्पकत्वमोक्षार्थयतमानत्वाद्युपपत्तिः निर्विशेषस्य स्वप्रकाशस्या ऽज्ञानावरणासम्भवात् । उपदेशकाभावेन मोक्षीययत्नासम्भवाच्च ।

यत्तु परेशो ऽन्तर्यामी शिष्यस्य स्वमतिकल्पितत्वशङ्काव्युदासाय गुरुशुश्रूषादिशास्त्रार्थवत्त्वाय च परोक्षनिश्चयवत् गुरुदेहं गतः तदभेदज्ञानात् तदाराधनया ऽपि सन्तुष्टो ब्रह्मोपदिशतीत्याश्रमोक्तम् । तन्न रम्यम् । परेशस्य श्रुतिसिद्धसार्वज्ञ्यस्य स्वभिन्नमायिकजीवापरोक्ष्यासम्भवेन उपदेशासम्भवात् । नहि मायामोहं विना मायिकपदार्थदर्शनं सम्भवति । न वा मायामोहितस्य परेशत्वमस्ति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्च । अनादिसंसारे कस्य चित् तत्त्वज्ञानं मोक्षश्चाभून्न वा । आद्ये जीवस्यैकत्वेनेदानीं संसारोपलब्धिर्न स्यात् । अन्त्ये सम्प्रदायाभावेन तत्त्वज्ञानासम्भवः । न च ज्ञानसामग्र्येव ज्ञानहेतुः न सम्प्रदायः । सम्प्रदायस्या ऽवेदतात्पर्यजन्यज्ञानसामग्र्यां निविष्टत्वात् । तत्त्वविश्वेन श्रुत्यादिसिद्धानां शुकवामदेवादीनां त्वदभिमत गौडपादादीनां मुक्तिर्नाभूत् । मम तु कथं भविष्यतीति शङ्कया वेदान्तश्रवणादौ निःशङ्कं प्रवृत्त्यनुपपत्तेश्च । न च शास्त्रप्रामाण्यदार्ढ्यात् प्रवृत्त्युपपत्तिः । श्रुतिप्रामाण्यादेव हि सिद्धो जीवभेदः पूर्वमपि केषाञ्चिन्मुक्तिः कुतो नाङ्गीक्रियते । श्रूयते च । यो यो देवानां प्रत्यबुध्यत स एव तदभवत् तथार्षाणां तथा मनुष्याणाम् । अजो ह्येको जुषमाणो ऽनुशेते जहात्येनां भुक्तभोगामजो ऽन्यः नित्यानां चेतनश्चेतनानामिति । स्मर्यते च बहवो ज्ञानतपसा पूता मद्भत्वमागताः । इदं ज्ञानमुपश्रित्य मम साधर्म्यमागता इति । न चोक्तवाक्यानि सार्वलौकिकभ्रमसिद्धभेदानुवादकानि भ्रमगृहीतमात्रग्राहित्वेना ऽत्यन्ताप्रामाण्यापत्तेः बाधकाभावेन भेदधियो भ्रमत्वासंभवाच्च । त्वन्मते सर्वप्रत्ययविषयब्रह्माभिन्नाभेदाद्यभावेन अभेदवाक्यानामेवानुवादकत्वाच्च ।

अतीतानागताश्चैव यावन्तः सहिताः क्षणाः । ततो ऽप्यनन्तगुणिता जीवानां राशयः पृथक् इत्यादि स्मृत्यनुसारात् प्रतिक्षणमेकैकजीवमुक्तौ अपि न जीवानां समाप्त्या संसारसमाप्तिः । एतेन हिरण्यगर्भ एव ब्रह्मप्रतिबिंबभूतो मुख्यो जीवः तदन्ये तु तत्प्रतिबिंबभूता जीवाभासाः संसृत्यादिभाज इति निर-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्तम् । हिरण्यगर्भमुक्तितः प्राक् कस्याप्यमुक्त्यापातात् । अतीतहिरण्यगर्भमुक्तेः श्रुत्यादिसिद्धत्वेनेदानीं संसार्युपलम्भायोगाच्च । सादिहिरण्यगर्भप्रतिबिंबस्थसंसारस्य सादित्वापाताच्च । अतः प्रतिदेहं वास्तवजीवभेदेन बन्धमुक्तिस्वर्गनरकगुरुशिष्यत्वादिव्यवस्थोपपन्नेति ॥ जीवैक्यपराजयः ॥ द्वावजावीशानीशौ । द्वा सुपर्णा सयुजा सखायौ । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति । य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति । यो विज्ञाने तिष्ठन् विज्ञानमन्तरो यमयतीत्याद्याः श्रुतयो भेदे मानम् । न चात्र भेदबोधकशब्दाभावः । भेदव्यपदेशाच्चान्यः । शारीरश्चोभयेऽपि हि भेदेनैनमधीयत इत्यादिसूत्रैः तच्छ्रुतीनां भेदपरतया व्याख्यातत्वात् । यदा पश्यत्यन्यमीशस्य महिमानमेति । पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेना ऽमृतत्वमेतीत्यादिश्रुतिभिः भेदज्ञानस्य मोक्षहेतुत्वोक्तेः । अस्त्यन्यो भूतात्मा स वा एषो ऽभिभूतः प्राकृतैर्गुणैरित्यथो ऽभिभूतत्वात् संमूढत्वादात्मस्थं भगवन्तं कारयितारं नापश्यदिति मैत्रायणीयश्रुत्या जीवेशभेदप्रतिपादनात् । स तत्र पर्येति जक्षन् क्रीडन् रममाणः सो ऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता । यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैतीति श्रुतिभिर्मुक्तावपि भेदोक्तेः । ननु सो ऽश्नुते सर्वान् कामानित्यादि वाक्यं न मुक्तौ भेदपरम् । येन ब्रह्मणः सहत्वं बोधयद्धि भेदपरं स्यात् । सहत्वं च ब्रह्मणः पुत्रेण सहागतः पितेत्यत्र प्रधानक्रियानुकूलतज्जातीयक्रियाकर्तृत्वेन किं वा

Digitization by Arya Samaj Charitable Foundation, Chennai

पत्न्या इवा ऽनुज्ञामात्रेण । ना ऽद्यः । ब्रह्मणो ऽपि भोगप्रसङ्गात् । ना ऽन्त्यः । ईशस्य प्राणिमात्रभोगे ऽनुज्ञादातृत्वादप्राधान्यापत्तेरिति चेन् मैवम् । ब्रह्मणा हेतुना सह युगपत् सर्वान् कामान् प्राप्नोतीत्यर्थात् । यमेवैष वृणुते तेनैव लभ्यः । तेषामहं समुद्धर्ता मृत्युसंसारसागराद् इति स्मृतेश्च मोक्षे भेदसिद्धेः । यद्वा ब्रह्मणा चतुर्मुखे सह । तन्मुक्तिकाले मुक्तो भवतीति अर्थात् । सह शाखया प्रस्तरं प्रस्तरं प्रहरन्तीत्यत्र प्रस्तरेण सह प्रस्तरप्रहरणकाले प्रसिद्धकालां शाखां प्रहरतीति विभक्तिव्यत्ययेन सह शब्दस्य वार्तिके कालार्थकताया उक्तत्वात् । ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे । तस्यां ते च कृतात्मानः प्रविशन्ति परं पदम् इति स्मृतेः ।

न च सर्वशब्दबहुवचनादेरल्पत्वनिवृत्तिमात्रपरत्वम् । लक्षणायां मानाभावात् । न च जीवेषु जगत्सर्जनादिकामानां तवा ऽपि बाधः । सर्वशब्दस्यासंकुचद्वृत्तेरयोगादिति वाच्यम् । जगद्व्यापारवर्जमिति सूत्रकृतैव संकोचस्योक्तत्वात् । तद्विषयकाभिलाषाणामेव जीवस्या ऽसंभवाच्च ।

यत्तु पृथक् जनानां तत्र तत्र क्रमेण स्त्रीपरिरम्भणादिना व्यङ्ग्यं यत् सुखं ब्रह्मात्मकं तदभिप्रायेण सर्वान् कामान् इति तृतीया चेत्थं भावे ब्रह्मरूपेण मुक्तः सह युगपत् परमानन्दमनुभवतीत्यर्थ इति । तन्न । अशब्दार्थत्वात् । त्वन्मते सदा प्रत्यक्षसिद्धस्वरूपातिरिक्तस्यानुभाव्यस्य मोक्षेप्यभावाच्च । सो ऽश्नुते सकलान् कामान् क्रमेण हि सुरर्षभाः । विदितब्रह्मरूपेण जीवन्मुक्तो

Digitization by Arya Samaj Charitable Foundation, Chennai

न संशयः इति स्मृतिरनुकूलैव । विदितं ब्रह्मरूपं येन चतुर्मुखेन तेन सहेति तदर्थात् ।

के चित्तु । अत्राऽप्रधानतृतीयानिर्देशात् भोगे परब्रह्मणो ऽप्राधान्यं तेन वशीकृतत्वं च लभ्यते । तत्तु फलत्वेन प्रधानभूतस्य सर्वप्रभुरूपस्य सर्वमूलभूतस्य तदैव संभवति यदि मध्ये वशीकरणसमर्था भक्तिः स्यात् । अत एव । अहं भक्तपराधीनः, वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा इति श्रीभागवते भगवता स्वस्य भक्ताधीनत्वमुक्तमित्याहुः ॥

ननु तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम् । अनश्नन् अन्यो ऽभिपश्यतीति ज्ञः । तावेतौ सत्त्वक्षेत्रज्ञौ तदेतत् सत्त्वं येन स्वप्नमभिपश्यति । अथ यो ऽऽयं शारीर उपद्रष्टा स क्षेत्रज्ञ इति पैङ्गिरहस्यब्राह्मणेन बुद्धिजीवपरतया ऽयं मन्त्रो व्याख्यात इति चेन्न । सत्त्वशब्देन जीवस्य क्षेत्रज्ञशब्देन चेशस्य चोक्तेः । रजनीं घोरसत्त्वनिषेविताम् । महिषीं ससत्त्वाम् । क्षेत्रज्ञं चा ऽपि मां विद्धि इत्यादिषु जीवेशयोस्तयोः प्रसिद्धत्वात् । धान्येन धनमितिवत् येनेत्याद्यभेदे तृतीया । शारीरे जीवे उपद्रष्टा । उपदासीनो ऽन्तर्यामी परेश इति ब्राह्मणार्थः ।

न च स सत्र पर्येति यक्षन् क्रीडन् रममाण इति श्रुत्युक्तो ऽवान्तरमोक्षः । अस्मात् शरीरभेदात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणा ऽभिनिष्पद्यत इति स्वस्वरूपाविर्भावरूपमोक्षोक्तेः । नित्यो नित्यानां चेतनश्चेतनानाम् एको बहूनां यो विदधाति कामान् अजो ह्येको जुषमाणो ऽनुशेते जहात्येनां भुक्तभोगामजो ऽन्यः

Digitization by Arya Samaj Charitable Foundation, Chennai

इत्याद्याः श्रुतयः स्पष्टं भेदं वदन्ति । न च द्वौ चन्द्रावित्यादिवत् कल्पितभेदेनोपपत्तिः । अजो ऽन्य इत्यादेर्मृषाभेदपरत्वे ऽप्रामाण्यापत्तेः एतच्छ्रुतिविरोधादेव त्वदभिमतश्रुतेरन्यपरत्वापत्तेश्च ।

यत्तु प्राञ्चो ऽद्वैतिनो जीवेशावाभासेन करोति माया ऽविद्या च स्वयमेव भवतीति श्रुत्या ऽविद्यानिमित्तमेव जगत् प्रतिभासं चक्रवत्सत्कार्यवादमाश्रित्य स्थित्यादिकाले प्रतीयमानस्य भेदजातस्य सूक्ष्मरूपेण तस्यामवस्थितत्वेन तस्या वैचित्र्यं प्रदर्शयन् सैषा चित्रेतिश्रुतिस्तस्या जगदाकारेणावस्थाने सामर्थ्यं दर्शयतीति वदन्ति । तन्न रमणीयम् ।

तथाहि । अविद्यासंबन्धाद् ब्रह्मणो ऽनेकवदवभासः कस्येति विचारणीयम् । न तावद् ब्रह्मणः । तत्र भ्रमायोगात् । ना ऽपि जीवस्य । तादृशावभासविषयत्वात् । नहिं दोषवशात् गृहीतचन्द्राणामेव स्वानेकत्वावभासः संभवति चन्द्रस्य वा । तेषामलीकत्वात् । द्रष्टरि सत्येव तेषां भानाच्च । दोषासंबन्धादेव न तस्य । तथा चा ऽऽभासप्राधान्येन न जीवेश्वरभावः । अविद्यासामर्थ्यात् । सर्वमित्युक्तौ ब्रह्मणो ऽप्यधिष्ठानप्राधान्येना ऽनपेक्षत्वापत्तेश्च । जीवेशादिश्रुत्यर्थस्तु । जीवेशौ आभासेन युक्तौ करोति । योगो विषयविषयिभावः । आभासो ऽन्यथाज्ञानम् । जीवं देहाभिन्नं ब्राह्मणः स्थूलो ऽहमित्यादि भासयति । ईशं जीवतुल्यतया भासयति ना ऽहं प्रकाशः सर्वस्य योगमायासमावृतः अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो ममाव्ययमनुत्तमम् । इति स्मृतेः । माया ऽविद्यापदवाच्या सैव भवति शक्तिशक्तिमतोरभेदात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्तु यौ द्वौ विम्बप्रतिविम्बभूतौ जीवेश्वरावस्मिन् शरीरे तिष्ठतः तयोर्मध्ये बुद्धिप्रतिविम्बितस्तदभेदारोपात् तद्धर्माभिमानी कर्मफलमत्ति । अत एव अन्यः सन् बुद्धितादात्म्यरहितः स्वरूपचैतन्यात्मना ऽनश्नन्नभिचाकशीति भोगरहित उदासीनः प्रकाशत इति द्वा सुपर्णेति मन्त्रार्थ इत्याश्रमोक्तम् । तन्नादरणीयम् । य आत्मनि तिष्ठन् आत्मानमन्तरो यमयति यो विज्ञाने तिष्ठन् विज्ञानमन्तरो यमयतीत्यादिश्रुत्या हि जीवस्थत्वमीशस्योक्तम् । नहि बिम्बः प्रतिविम्बस्थो ऽस्ति । यो वेद निहितं गुहायां । अहमात्मा गुडाकेश सर्वभूताशयस्थितः । ईश्वरः सर्वभूतानां हृद्देशे ऽर्जुन तिष्ठति । इतिश्रुतिस्मृतिभिः हृदयस्थत्वं परेशस्योक्तम् । तच्च जीवस्य प्रतिबिम्बत्वे ऽसंगतं स्यात् । उपाध्यन्तर्गतस्यप्रतिबिम्बासंभवाच्च । नहि ब्रह्मैकदेशे उपाधिस्त्वयोपेयते । आकाशस्य सदेशत्वात् जलानन्तर्गतस्यैव हि प्रतिबिम्बः । बिम्बभूतस्य शुद्धस्या ऽसङ्गस्य देहे वृत्तेरसंभवाच्च । अस्मदभिप्रेतसर्वेशस्थानीयस्य शुद्धभिन्नतया मायाद्युपहितस्य स्वीकारे ऽपि नोपपत्तिः बुद्धितादात्म्यारहिते ऽपि तस्मिन् जीवाभेदासंभवात् ! नहि सोपाधिकयोरभेदस्त्वयोपेयते । संभवति वा ।

किञ्च विशिष्टस्य शुद्धादन्यत्वे ऽपि शुद्धस्य व्यावर्तकधर्मशून्यस्य विशिष्टाद्भेदासंभवात् । एकस्यैकस्मिन्नेव काले बुद्धितादात्म्यापन्नत्वानापन्नत्वयोर्विरोधाच्च । न चारोपितभोक्तृत्वं वास्तवे भोक्तृत्वम् । त्वन्मते चैतन्ये वास्तवभोक्तृत्वस्या ऽभावात् । अवास्तवभोक्तृत्वाभाव एव ह्यभोक्तृत्वपदार्थो वाच्यः ।

यदपि तेनैवोक्तम् जीवानुवादपूर्वकं तस्यैव केवलचैतत्यात्मना

Digitization by Arya Samaj Charitable Foundation, Chennai

भोक्तृत्वाभावे दर्शिते ऽभोक्तृजीवस्येशभेदे मानाभावात् नास्ति तयोर्भेद इति तन्निषेधायैवानुवादः । तथा च । अहंधीविषयं जीवस्वरूपमाविद्यकं तद्भिलक्षणमशयनायादिधर्मरहितं चैतन्यमात्रं ब्रह्मभिन्नं तत्स्वरूपमिति तात्पर्यमिति । तदपि न श्रद्धेयम् । चेतनो ऽहं करोमीत्यादिना चेतनत्वेनैव भोक्तृत्वसिद्धेः । अहंधीसिद्धभिन्नजीवस्वरूपे मानाभावाच्च । अशनायादिराहित्यस्वरूपातिरिक्तस्य त्वन्मते ऽभावात् स्वरूपमात्रस्य अहंधीविषयत्वाच्च ।

किञ्च जीवस्याभोक्तृत्वे बन्धमोक्षयोर्वैयधिकरण्यापत्तिः । न च ब्रह्मस्वरूपेण नित्यमुक्तस्यात्मन एव बुद्धितादात्म्येन संसारित्वान्नानुपपत्तिरिति वाच्यम् । स्वाभाविकसंसारस्य चैतन्ये ऽभावादस्वाभाविकसंसृतिस्पृष्टास्पृष्टौ द्वेत्यादिश्रुतिविषयौ हि त्वया स्वीकार्यौ । नह्येक एवैकस्मिन् क्षणे मिथ्यासंसारस्पृष्टो ऽस्पृष्टश्च संभवति ।

किञ्चा ऽस्य निषेधाया ऽनुवादे तत्सत्यमित्यादिब्रह्मसत्त्वश्रुतिरप्यसद्वा इदमग्र आसीत् । न सन्नासदुच्यत इत्यादिब्रह्मसत्त्वनिषेधायानुवादिनी स्यात् । सन् घटः सत्सुखमित्यादिप्रत्यक्षेण त्वन्मते ब्रह्मसत्त्वस्य प्राप्तेः । न च सत्यादिवाक्यार्थस्य त्रिविधपरिच्छेदरहितत्रिकालाबाध्यसत्त्वस्य प्रत्यक्षतो ऽप्राप्तिरिति वाच्यम् । त्रिविधपरिच्छेदे राहित्यादेः स्वरूपभिन्नस्याखण्डार्थकवेदान्तैरप्यबोधनात् । नहि प्रत्यक्षविषयानधिकविषयकं नानुवादकम् ।

न च असद्वा इदमग्र इत्यस्य सृष्टेः पूर्वं जगदनभिव्यक्तनाम-

Digitization by Arya Samaj Charitable Foundation, Chennai

रूपमव्याकृतब्रह्मकमित्यर्थ इति वाच्यम् । अपदार्थत्वादवाक्यार्थत्वात् । ब्रह्मात्मकताया जडादेर्बाधितत्वाच्च । न च ततो वै सदजायत इत्युत्तरवाक्यविरोधः । असतः सदुत्पत्त्यनुपपत्तेः । कथमसतः सज्जायेतेति श्रुत्यन्तरे तन्निषेधाच्चेति वाच्यम् । सद्भिन्नत्वमेव ह्यस्माभिरुपपादितम् । सत इत्यादौ सच्छब्दस्यासद्भिन्नत्वपरत्वं स्यात् । ततः सद्भिन्नात् असद्भिन्नमजायतेत्यर्थः स्यात् । असतः सद्भिन्नात् सत् पारमार्थिकं कथं जायेत । किन्तु सद्भिन्नमेव जायत इत्यर्थः स्यात् ।

यदपि तेनोक्तम् । तयोर्मध्ये एको ऽश्नाति इत्युक्ते देवदत्तो वामेना ऽक्ष्णा पश्यतीत्युक्त्या तदितरेण दर्शननिषेधवत् तन्निषेधासिद्धेस्तदुक्तिवैयर्थ्यमिति । तदपि मन्दम् । यथा देवदत्तो वामेन नेत्रेण सम्यक् पश्यति इत्युक्ते नेत्रान्तरदर्शननिषेधं विना ह्यसम्यग्दर्शनस्य निषेधः तथा तयोरन्यः स्वाद्वत्तीत्युक्ते ऽप्यस्वाद्वदनस्य निषेधं विना न निवृत्तिरिति भवति सार्थको निषेधः ।

किञ्च समाने वृक्षे पुरुषो निमग्नो ऽनीशया शोचति मुह्यमान इति श्रुतिरपि स्पष्टं मानम् ।

यत्तु समाने बिम्बप्रतिबिम्बरूपजीवेश्वराश्रये शरीरे पुरुषो बुद्ध्युपहितो निमग्नः कर्तृत्वाभिमानवान् स्वरूपेणाप्रकाशान्निमग्नो ऽनीशया स्वस्यानन्दरूपेश्वरभावाऽप्रतीत्या शोचति विषयागमापायनिमित्तं दुःखमनुभवतीति आश्रमो व्याचख्यौ । तन्नादर्तव्यम् । शुद्धस्य बिम्बभूतस्या ऽसङ्गस्य तव शरीराश्रितत्वासंभवात् मायाद्युपहितस्येशस्य प्रतिबिम्बाभेदासंभवात् । बिम्बभावापत्तिरूपमुक्तेर-

Digitization by Arya Samaj Charitable Foundation, Chennai

संभवाच्च । नहि जीवस्य त्वन्मते परेशाभावापत्तिर्मोक्षः । अनीशया ऽविद्यया मुह्यमानो देहादावहमित्याद्यभिमानवान् शोचति । तद्वृद्धिह्रासादिना दुःखादियुक्तो भवतीत्यर्थात् ।

न च प्रत्यक्षप्राप्तभेदानुवादित्वाद् भेदश्रुतिर्दुर्बला । वर्तमानमात्रग्राहिप्रत्यक्षागृहीतत्रैकालिकभेदपरत्वेन श्रुतेरननुवादकत्वात् । न चाजो ऽन्य इत्यादौ त्रिकालाबाध्यत्वबोधकपदाभावः वर्तमानादिकालोदासीनतया बोध्यमानभेदस्य श्रुतिप्रामाण्यवशात् त्रिकालाबाध्यत्वसिद्धेः । "न त्वेवा ऽहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् । इति भेदव्याप्यबहुत्वस्य प्रत्यक्षायोग्यातीतादिकालसम्बन्धोक्तेः स्मृतेश्च श्रुतिव्याख्यारूपत्वात् ।

यद्यपि भगवद्वाक्ये भेदबोधकं पदं नास्ति । तथा ऽपि आमनमस्यामनस्य देवास्तिस्र आहुतीरित्यादौ बहुत्वसंख्यया भिन्नास्तिस्र आहुतयः सिध्यन्ति । तथा वयमित्युक्तबहुत्वसंख्यया भेदः सिध्यति । यथा च तप्ते पयसि दध्यानयति सा वैश्वदेवी आमिक्षेत्यत्रामिक्षाद्रव्यकयागं विधाय वाजिभ्यो वाजिनमिति वाजिनाख्यगुणो विहितस्यामिक्षारूपद्रव्यावरुद्धे यागे निवेशासंभवेन पूर्वयागाद् भिन्नयागबोधकत्वं तथा भगपदुक्तयुष्मदर्थत्वस्य भगवत्यन्वयासंभवेन ततश्चेतनान्तरबोधकत्वं निष्प्रत्यूहम् ।

किञ्च यथा य एवं विद्वान् पूर्णमासीं यजते य एवं विद्वान् आमावास्यां यजत इति विद्वद्वाक्यमनुवादमपि षण्णां यज्ञानां दर्शपूर्णमासाख्यसमुदायद्वयापादकत्वेन सार्थकम् । तथा प्रकृते ऽप्यस्तु ।

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्च प्रत्यक्षस्य प्रामाण्ये तत एव भेदसिद्धिरस्तु । श्रुतिर्नित्यानुवादः । अप्रामाण्ये च न स्यादेव श्रुतेरनुवादकत्वम् । न च ज्ञातज्ञापकत्वमनुवादकत्वे तन्त्रम् न तु प्रमाणगृहीतग्राहित्वमिति वाच्यम् । अप्रमाणगृहीतमात्रग्राहित्वेन शुक्तिरूप्यबोधकवाक्यवत् श्रुतेरत्यन्ताप्रामाण्यापत्तेः इष्टापत्तौ च तद्दृष्टान्तेन वेदमात्रस्य तत्त्वापत्तेः । स्वाध्यायो ऽध्येतव्य इति विधेः पीडनापत्तेः । व्यावहारिकप्रामाण्यस्या ऽप्यप्रामाण्यापरपर्यायत्वेन श्रुतेरप्रामाण्यापत्तिभिया ऽनुवादकत्वे ऽतन्त्रत्वाच्च ।

न च तत्त्वावेदकमानसिद्धस्यैवानुवाद इत्यत्र दृष्टान्ताभावः । प्रमाणस्य प्रमाणगृहीतग्राहित्वेनैवानुवादकत्वात् । अनुवादकत्वे ऽपि तत्प्रकारकत्वरूपयाथार्थ्यप्रामाण्याहानेश्च ।

न च शास्त्रवैयर्थ्यम् । यथा पिशाचभेदे प्रत्यक्षे ऽपि पिशाचो ऽप्रत्यक्षस्तथेशभेदे प्रत्यक्षे ऽपि ईशस्या ऽप्रत्यक्षत्वेन तत्परशास्त्रस्य सार्थक्यात् ।

किञ्चौपनिषदस्य ब्रह्मणः शास्त्रातिरिक्तेनाप्राप्तेस्तद्धर्मिकस्य तत्प्रतियोगिकस्य चाभेदस्य न शास्त्रनिरपेक्षप्रत्यक्षादिना प्राप्तिः ।

ननु प्रतियोगिग्रहार्थं शास्त्रापेक्षत्वे ऽपि समानविषयकप्रमाणपूर्वकत्वानियमेन प्रत्यक्षस्य भेदप्रमापकत्वेनानुवादकत्वोपपत्तिरिति चेन्न । स्वनिरपेक्षप्रमाणगृहीतग्राहित्वेनैव ह्यनुवादकत्वम् । अन्यथा स्मृतिगृहीतार्थग्राहित्वेनानुवादकत्वापत्तेः । तथा च श्रुतिसापेक्षगृहीतग्राहित्वेन श्रुतेरननुवादकत्वमिति । भेदश्रुतेरनुवादकत्व पराजयः ॥

नन्वनुवादकत्वाभावे ऽपि व्यावहारिकभेदपरत्वेनैव श्रुत्युपपत्ति-

Digitization by Arya Samaj Charitable Foundation, Chennai

रिति चेन् मैवम् । श्रुतेरप्रामाण्यापत्तेः । न च अर्थवादवाक्यवदुपपत्तिः । अर्थवादतात्पर्यविषयार्थस्य प्राशस्त्यादेरिव भेदवाक्यार्थस्या ऽबाधितस्या ऽसत्त्वात् ।

न चाभेदश्रुतिविरोधेन प्रतीयमाने ऽर्थे ऽप्रामाण्यमिष्टम् । अभेदश्रुतेरखण्डचिन्मात्रपरत्वेन भेदाविरोधित्वात् । नहि धर्मिमात्रबोधकं मानम् तत्र धर्मवैशिष्ट्यविरोधि । न चावान्तरतात्पर्येण भेदो महातात्पर्येण चाखण्डं बोध्यते इत्यवान्तरतात्पर्यमादाय विरोधोपपत्तिरिति वाच्यम् । अवान्तरतात्पर्यविषयस्य भेदाभावादेर्निषेधकाभावेन तात्त्विकत्वापत्तेः । महातात्पर्यजन्यबोधस्य सर्वाविरोधित्वात् । अवान्तरतात्पर्यजन्यबोधस्य व्याघातेन स्वविहिताननिषेधकत्वात् ।

न च भेदाद्यभावो ब्रह्मैव । तज्ज्ञानस्य भेदाविरोधित्वात् ।

किञ्च । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गे ऽपि नोपजायन्ते प्रलये न व्यथन्ति च इत्यादिस्मृतौ सर्गाद्यभावोक्तेः । न तत्र मायाकिमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः । श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः । इतिस्मृतौ मायानिषेधाच्च । यो वेद निनिहितं गुहायां सो ऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता । इत्यत्र सर्वकामावाप्तेः शुद्धब्रह्मज्ञानफलत्वोक्तेश्च । त्वया विशुद्धब्रह्मविषयत्वेन स्वीकृताया भूमविद्यायाः फलोक्त्यवसरे तस्य सर्वेषु लोकेषु कामचारो भवति । पञ्चधा सप्तधेति भेदोक्तेः । परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । स तत्र पर्येति यक्षन् क्रीडन् रममाण इत्यादौ स्वरूपाभिव्यक्त्युक्तेश्च । तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं सा-

Digitization by Arya Samaj Charitable Foundation, Chennai

म्यमुपैति । इत्यत्र कर्मत्तयोक्तेश्च । त्वन्मते ऽपि भेदभोगादिपरेषु फलाध्यायान्तपादस्थेषु जगद्व्यापारवर्जं संकल्पादेव तच्छ्रुतेः । भोगमात्रसाम्यलिङ्गाच्चेत्यादिसूत्रेषु प्रक्रान्तशुद्धविद्यायाः फलस्यैव वक्तव्यत्वाच्च । पृथगात्मानं प्रेरितारं च मत्वा जुष्टः ततस्तेनामृतमेतीति भेदज्ञानान्मोत्तोक्तेश्च ।

ननु सगुणोपासनया ब्रह्मलोकं गतस्या ऽपि न स पुनरावर्तते न स पुनरावर्तत इत्यादिश्रुत्या दैनंदिनसर्गाद्यसंबन्धो बोध्यत इति चेन्न । संकोचे मानाभावात् । न च न तत्र मायेत्यनेन स्पर्धादिनिषेधः । मायाशब्दस्य स्पर्द्धायां लाक्षणिकत्वे मानाभावात् ।

न च यो वेदेति श्रुतिः सर्ववैषयिकसुखानाम् एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या ब्रह्मानन्दे ऽन्तर्भावोक्तेस्तदभिप्रायेति न तद्बलान्नानाकामावाप्तेः शुद्धज्ञानफलत्वमिति वाच्यम् । अशब्दार्थत्वात् । वैषयिकाणां मृषाभूतानां ब्रह्मानन्दे ऽन्तर्भावासंभवाच्च ।

न च तस्य सर्वेष्वित्यादेर्निर्गुणविद्यास्तावकत्वेना ऽप्युपपत्तिः । निर्गुणविद्याया एवा ऽलीकत्वात् ।

न च परमं साम्यमैक्यमेव । अपदार्थत्वात् । स्वरूपभिन्नैक्यस्य तत्प्राप्तेश्च तवा ऽलीकत्वाच्च । न च जुष्टं यदा पश्यत्यन्यमीशस्येत्यत्रान्यपदं देहादिभिन्नमिति न तेन जीवेशभेदसिद्धिः । यो ऽहं बाल्ये पितॄनन्वभूवं सो ऽहं नप्तॄननुभवामि इति देहात्मभेदस्य प्रत्यक्षत्वेन श्रुतेर्वैयर्थ्यापत्तेः । ईशपदस्वारस्याच्च ।

यत्तु जुष्टं कार्यकारणसंधातैः सेवितम् । अविवेकिभिस्तदात्म-

Digitization by Arya Samaj Charitable Foundation, Chennai

तया गृहीतं । यदा ऽधिकारी अन्यं विवेचनात् देहत्रयात् पृथग्भूतं देहत्रयसाक्षितया ज्ञातं शोधितत्वंपदार्थम् ईशं सन्तं पश्यति ईश इति स्वात्मानं पश्यति साक्षात् करोति इति यावत् । तदा ऽस्यात्मत्वेना ऽवगतस्य महिमानम् अपरिच्छिन्नानन्दात्मतामेति । नान्तरीयकतया शोकनिवृत्तिमाह वीतशोक इति आश्रमो व्याचख्यौ । तन्नोपपत्तिमत् । कार्यादिसंघातस्य जडस्य सेवनकर्तृताया मुख्यतो ऽसंभवात् । देहादिविवेकज्ञानस्य सदैव सत्त्वात् । सर्वनियन्तृत्वादिरूपेश्वरत्वज्ञानस्य त्वन्मते मोक्षाहेतुत्वाच्च । 'नाहमीश्वर इति प्रत्यक्षेण बाधितत्वाच्च । जीवेशानुगतस्वरूपमात्रस्य च जगदधिष्ठानतया सुखादिसाक्षितया सदा भानादुपदेशवैयर्थ्याच्च । स्वरूपस्य सदोपलब्ध्या प्राप्त्युक्तेरसंगतत्वात् । महिमपदस्या ऽत्यन्तासंगतेश्च । स्वरूपमात्रस्य त्वन्मते सदाभानादधिकस्य वेदान्तजन्यवृत्तावप्यभानात् यदा तदेत्यसंगतेश्च ।

एतेन यद्वा जुष्टं शुद्धान्तःकरणैः सनकादिभिर्निरन्तरमात्मत्वेन सेव्यमानम् अन्यं कार्यकारणसंघाताद्विलक्षणम् ईशं यदा पश्यतीत्यर्थ इत्यपि तदुक्तं निरस्तम् । अशुद्धान्तःकरणागृहीतस्य शुद्धान्तःकरणग्रहणयोग्यस्य स्वरूपातिरिक्तस्य तवा ऽभावात् । तथा च जुष्टं लक्ष्म्यादिसेवितं सर्वस्मात् जीवजगदन्यमीशं सर्वनियन्तारं पश्यति साक्षात् करोति यदा तस्य तदीयं पूर्णज्ञानानन्दनिर्मुक्तत्वादिलक्षणं महिमानमेतीति श्रुत्यर्थः ।

न चान्यदीयमहिमप्राप्तिरन्यस्या ऽयुक्ता तत्सदृशमहिमानमित्युक्तौलक्षणाप्राप्तिरिति वाच्यम् । तद्दत्तस्य तदधीनस्य च महिम्नस्तदी-

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्वात् । न चैवं जीवेशतदुभयभेदानां ज्ञानं मुक्तौ हेतुः स्यात् । तथा च तमेवविदित्वा ऽतिमृत्युमेति । ना ऽन्यः पन्था विद्यते ऽयनाय इति विरोध इति वाच्यम् । तत्पदेन सहस्रशीर्षत्वाद्यनन्तगुणकस्योपक्रान्तस्य परामर्शात् । यथा हि राजानमेव पश्यत्यत्र पुरुषान्तरदर्शनस्य व्यावृत्तिः प्रतीयते न तु चमरच्छत्रशूरत्वादिधर्माणां तथा ऽत्रा ऽपि जीवादिधर्म्यन्तरज्ञानमेव व्यावर्तते न तु तद्धर्मज्ञानमपि । ब्रह्मविद् ब्रह्मैव भवतीत्यस्य कीटो भृङ्गो भवतीतिवज्जीवस्य बृहद्गुणकत्वरूपब्रह्मभवनमित्यर्थः ।

यत्तु परमं साम्यमुपैतीत्यस्यैक्य एव पर्यवसानं भेदगर्भसादृश्यम् । न तत्समश्चाभ्यधिकश्च दृश्यते । न त्वत्समोस्त्यभ्यधिकः कुतो ऽन्य इति श्रुतिस्मृतिविरूद्धम् इति । तन्न । निर्मुक्तत्वादिना साम्योक्तेः । जगत्कर्तृत्वादिना समाधिकनिषेधाच्च । भोगमात्रसाम्यलिङ्गाच्च । जगद्व्यापारवर्जमिति सूत्रोक्तेः ।

न च विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैतीति विरोधः । यथा जले निक्षिप्तजलस्य पृथङ्नामरूपानुपलब्धावपि नैक्यम् । तथा प्राकृतनामादिहीनस्य भेदोपपत्तिः । नहि जले क्षिप्तजलमैक्यं प्राप्नोति । वृद्ध्याद्यनापत्तेः । आत्मा ह्येषां स भवतीत्यस्य विद्वानात्मवत्सर्वेषां प्रेमास्पदीभवतीत्यर्थः ।

यत्तु पृथगात्मेत्यादेः आत्मानं कार्यादिसंघातात् पृथक् विलक्षणं पृथक्तया ज्ञातमात्मानं प्रेरितारम् ईशं च मत्वा ऽमृतत्वमेतीत्याश्रमव्याख्यानम् । तन्न सङ्गतम् । देहादिभेदज्ञानस्य प्रत्यक्षादित एव सिद्धेः । ईश्वरत्वप्रकारकज्ञानमात्रविधाने चकारासङ्गतेः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

कार्यादिसंघातपदाध्याहारदोषाच्च वेदान्तानामखण्डार्थकत्वमङ्गीकुर्वत एतदुक्तेरतितुच्छत्वाच्च । जुष्टस्ततस्तेनेत्यादिभागस्य वैयर्थ्यात् । इतिश्रुतेः पारमार्थिकभेदपरत्वम् ॥

किञ्च पूर्वतन्त्रे द्वितीयाध्याये यैः शब्दान्तरादिभिः कर्मभेद उक्तः तैरेव जीवेश्वरभेदसिद्धिः । एष एवं जीवं प्रबोधयति । एतस्मात् जीव उत्तिष्ठति । इति विरुद्धार्थधातुनिष्पन्नाख्यातशब्दान्तस्य नित्यः परो नित्यो जीव इत्यप्रत्यभिज्ञायमानपुनःश्रुतिरूपाभ्यासस्य द्वा सुपर्णेत्यादिसंख्याया अनश्नन्नित्यादेर्भेदकस्य गुणान्तरस्य यतो वाचो निवर्तन्त इत्यादिप्रकरणान्तस्य जीवेशादिनामधेयभेदस्य च सत्त्वात् । जीवेशभेदे शब्दान्तरादि ।

षड्विधतात्पर्यलिङ्गोपेतश्रुतिगम्यो भेदः परमार्थसन्नेव । तथाहि । आथर्वणे द्वा सुपर्णावित्युपक्रमः परमं साम्यमुपैतीत्युपसंहारः । तयोरन्यः अनश्नन्नन्यः अन्यमीशमित्यभ्यासः । शास्त्रैकगम्येश्वरप्रतियोगिकस्य कालत्रयाबाध्यभेदस्य शास्त्रं विना ऽप्राप्तेरपूर्वता । पुण्यपापे विधूयेति फलम् । तस्य महिमानमेतीति स्तुतिरूपो ऽर्थवादः । अन्यो ऽनश्नन्नित्युपपत्तिः । अत्र भेदव्यपदेशात् पृथगुपदेशादित्यादिसूत्रैर्व्याख्यातो द्विशब्दो भेदपरः । तदाक्षेपको वा । द्वित्वसंख्यैवैक्यविरोधिनीति वा भवत्युपक्रमो भेदपरः । तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं तत्सादृश्यम् । नायं सः किन्तु तत्सदृशः । नायं तत्सदृशः किन्तु स एवेति सादृश्यैक्ययोरेकतरनिषेधेना ऽन्यतरविधानात् । गगनं गगनाकारमित्यादि तु तत्सदृशवस्त्वन्तरनिषेधपरम् । गगनाद्येकदेशस्य तदेकदेशसादृश्यपरं वेत्युपसंहारो ऽप

Digitization by Arya Samaj Charitable Foundation, Chennai

भेदपरः । अन्यमीशमित्यत्रेशतो ऽन्यत्वं प्रति पश्यतीति प्रकृतो जीव एव प्रतियोगितया सम्बध्यत इत्यभ्यासो ऽपि भेदपरः ।

न चाथर्वणो प्रथममुण्डके कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति शौनकप्रश्नानन्तरं द्वे विद्ये वेदितव्ये इति विद्याद्वयमवतार्या ऽपरामुक्त्वा ऽथ परा यया तदक्षरमधिगम्यते । यत्तदद्रेश्यमग्राह्यमगोत्रमित्यादिपरविद्याविषयाक्षरप्रश्नोत्तरेण भेदस्यैवोपक्रम इति चेन्न । इन्द्राद्यवान्तरार्थपरत्वे ऋगाद्या एवापरविद्या उत्तमाक्षरपरत्वे तु ता एव परा इत्युक्तस्य सिद्धये तदर्थस्या ऽक्षरसर्वोत्तमत्वं प्रतिपादयितुं सर्वकारणत्वं ह्यक्षरस्योक्तम् । न त्वभेदः साकल्येना ऽदृश्यत्वादिगुणको धर्मोक्तेरितिसूत्रात् ।

न च द्वितीयमुण्डके एष एवेदं विश्वं ब्रह्मैवेदं विश्वं वरिष्ठमिति मध्ये ऽभेदोक्तिः । सर्वं समाप्नोषि ततो ऽसि सर्वमित्यनुसारात् पुरुषस्य विश्वव्यापकत्वोक्तेः । सत्ये ब्रह्मणि यथाश्रुतानृतविश्वाभेदस्या ऽसम्भवात् । त्वया ऽनङ्गीकाराच्च ।

न च तृतीयमुण्डकान्ते च परे ऽव्यये सर्वे एकीभवन्ति स यो ह वैतत् परमं ब्रह्म वेद ब्रह्मैवेदं भवतीत्यैक्यरूपफलेन संहार इति वाच्यम् । अभूततद्भावार्थकच्विप्रत्ययेन त्वत्प्रतिकूलस्य प्रागविद्यमानस्य निर्मुक्तत्वादिना सायं गोष्ठे गाव एकीभवन्तीत्यादिवत् एकस्थानस्थत्वादिना कीटभृङ्गन्यायेन वा जीवेशाभेदस्योक्तेः । अभेदे परं ब्रह्मेत्यसङ्गतेः ।

किञ्चान्तर्यामिब्राह्मणे ऽपि षड्विधतात्पर्यलिङ्गोपेतं वाक्यं भेदे प्रमाणम् । तथाहि । वेत्थ नु त्वं काप्यन्तमन्तर्यामिणमित्युपक्रमः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

एष आत्मा ऽन्तर्यामीत्युपसंहारः । एष त आत्मेत्याद्येकविंशतिकृत्वो ऽभ्यासः । अन्तर्यामित्वस्या ऽप्राप्ततया ऽपूर्वता । स वै ब्रह्मविदित्यादि फलम् । तच्चेत्त्वं याज्ञवल्क्यसूत्रमविद्वांस्तवान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते पतिष्यतीति निन्दारूपो ऽर्थवादः । यस्य पृथिवी शरीरं यं पृथिवी न वेदेत्याद्युपपत्तिः । नन्वनेन ह्येतत् सर्वं वेदेत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञापूर्वकं ब्रह्मवाद इदमग्र आसीत्तदात्मानमेवावेदाहं ब्रह्माहं तस्मात्तत्सर्वमभवदित्यभेदेनोपक्रम्य षष्ठाध्यायान्ते मैत्रेयब्राह्मणे यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येदित्याद्यभेदेनैवोपसंहार इति चेन्न । इन्द्रादिदेवानां ज्ञानाद्यत्फलं ब्रह्मज्ञानात्तत्तदधिकं च फलं भवतीत्येकविज्ञानश्रुत्यर्थात् । अत्र सुषुप्तौ ज्ञानज्ञेयादिकमात्मैव स्वयमेवाभूत् तत् केन साधनेन कं पश्येत् स्वेनैव स्वयमेव पश्येदित्यर्थः । तदानीं ज्ञानकरणचक्षुराद्यभावे यत्रेत्यादिश्रुतेस्तात्पर्यात् । अन्यथा शारीरश्चोभये ऽपि हि भेदेनैनमधीयत इत्यन्तर्यामिप्रकरणस्य भेदपरत्वं बोधयता सूत्रेण विरोधः ।

न च व्यावहारिकभेदपरं सूत्रम् । एवं बौद्धो ऽपि वेदव्याख्याता तच्छास्त्रं च वेदव्याख्यानं स्यात् । सो ऽपि ब्रह्मसूत्राणि व्याख्याया ऽन्ते मिथ्यैवैषो ऽर्थः । वास्तवं शून्यमेव तत्त्वमिति भवानिव ब्रूयात् । असद्वेत्यादिवाक्यं तस्य तात्त्विकं स्यादिति भेदे षड्विधतातात्पर्यलिङ्गम् ।

किञ्चैक्यं स्वरूपभिन्नं सत्यं चेदद्वैतहानिः । मृषात्वे भेदसत्यतापत्तिः । तत्त्वमसीत्यादेः सखण्डार्थकत्वं च स्यात् स्वरूपात्मकत्वे शास्त्रवैयर्थ्यम् । सापेक्षस्यैक्यस्य निरपेक्षत्वायोगो ऽपि ।

Digitization by Arya Samaj Charitable Foundation, Chennai

न च स्वरूपबोधकत्वेन न शास्त्रवैयर्थ्यम् । स्वप्रकाशस्याऽऽत्मनो विद्यादिसाक्षित्वेनाधिष्ठानतया च सदा प्रकाशमानत्वात् । ऐक्याभिन्ननिर्विशेषस्वरूपस्याऽऽवरणे जगदान्ध्यापत्तेः ।

किञ्चाभेदे ऽभेदत्वपारमार्थिकत्वासद्वैलक्षण्यादीनि तत्त्वतः सन्ति न वा । आद्ये सद्वितीयत्वापत्तिः । द्वितीये ऽभेदत्वहानिः । न चात्मस्वरूपाण्येव तानीति वाच्यम् । आत्मस्वरूपस्य सर्वैः स्वीकृतत्वे त्वद्रीत्या नित्यसिद्धत्वेन च शास्त्राविषयत्वात् ।

न च जीवावृत्तिधर्मानधिकरणत्वं तदिति वाच्यम् । जीवावृत्तिधर्मानधिकरणत्वस्य शून्ये ऽपि सत्त्वेन तस्या ऽपि जीवाभिन्नत्वापत्तेः ।

न च शून्यं निःस्वरूपम् आत्मा तु सस्वरूप इति वाच्यम् । स्वरूपित्वादिधर्महीनस्यैक्यस्य सस्वरूपत्ववच्छून्यस्या ऽपि सस्वरूपत्वसौलभ्यात् ।

किञ्च तदवृत्तिधर्मनिषेधे तद्वृत्तिधर्मविधानमेव । विशेषनिषेधस्य शेषाभ्यनुज्ञाफलकत्वात् ।

ननु विशेषनिषेधे ऽपि न शेषाभ्यनुज्ञा । वायौ न नीलं रूपमित्यस्य रक्तं प्रत्यनभ्यनुज्ञातत्वात् । इति चेन्न । विशेषनिषेधे शेषाभ्यनुज्ञा ऽन्यप्रकारासंभवे तस्य तथात्वमिति नियमात् । वायौ नीरूपत्वरूपतृतीयप्रकारस्य सत्त्वात् । नहि ब्रह्मणि धर्मबोधकमानवद्वायौ रूपबोधकमानमस्ति ।

न च जीवावृत्तिधर्मानधिकरणत्वोपलक्षितात्मस्वरूपं मया ऽभ्युपेयत इति वाच्यम् । तादृशधर्मानधिकरणत्वस्य ब्रह्मभिन्नस्योपलक्ष-

Digitization by Arya Samaj Charitable Foundation, Chennai

णतया बोधने श्रुतेः सखण्डार्थकत्वापत्तेः । अबोधने ज्ञातमात्रज्ञापकत्वेन वैयर्थ्यात् । नित्यसिद्धस्य निर्विशेषस्य धर्मान्तरोत्थापनेन व्यावर्त्यत्वरूपोपलक्षितत्वायोगाच्च ।

वस्तुतस्तु जीवावृत्तिधर्मानधिकरणत्वं सर्वज्ञत्वादिविशिष्टे त्वदभिमते निर्धर्मके वा । नाऽऽद्यः । व्याघातात् । अल्पज्ञत्वेनानुभूयमानजीवावृत्तिसर्वज्ञत्वादेस्तत्र सत्त्वात् । नाऽन्त्यः । जीवभिन्नेऽपि तस्मिन् निर्द्धर्मकत्वादेव तदवृत्तिधर्मानधिकरणत्वोपपत्तेः ।

एतेन निर्द्धर्मकत्वस्याऽत्र तृतीयप्रकारत्वसम्भव इति नव्यभिन्नूक्तं निरस्तम् । निर्द्धर्मकत्वरूपप्रकारसत्त्वासत्त्वाभ्यां सधर्मकत्वसिद्धेरिति पराभिमतैक्यपराजयः ।

किञ्च सार्वज्ञ्यादिविशिष्टयोरैक्यमयोग्यतापराहतम् ।

ननु विरुद्धाकारस्याऽविवक्षया ब्रह्मानुभवाविषयत्वरूपस्त्यागो न त्वपायः । स चरमसाक्षात्कारसाध्यः । तथा च तत्तेदन्ते इवानपेते अपि सार्वज्ञ्यासार्वज्ञ्येनाश्रयाभेदविरुद्धे इति चेन्न तत्तेदन्तयोः कालभेदेनैकत्र सम्बन्धसम्भवेन दृष्टान्तासिद्धेः नहि तत्तेदन्ते एकत्रैतत्कालावच्छेदेन प्रतीयेते येन विरोधः स्यात् ।

न च सार्वज्ञ्यासार्वज्ञ्यादिकं कालभेदेनैकत्र वर्तते येन सोऽयं देवदत्त इति दृष्टान्तः स्यात् । तत्तेदन्तयोः प्रत्यभिज्ञायामभाने तात्कालिकैतत्कालिकपिण्डाभेदासिद्ध्यापत्त्या पिण्डस्य क्षणिकत्वापत्तेः ।

एतेन तद्देशकालविशिष्टे एतद्देशकालवैशिष्ट्यम् । एतद्देशकालविशिष्टे तद्देशकालवैशिष्ट्यं वा । विशिष्टयोरैक्यं वा सोऽयमि-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्यादिवाक्यप्रतिपाद्यम् । नाऽद्यः । तत्कालादेरिदानीं सत्त्वापत्तेः । न द्वितीयः एतत्कालादेस्तदा सत्त्वापत्तेः । न तृतीयः । बाधादिति निरस्तम् । पक्षत्रयस्याऽपि निर्दुष्टत्वात् । तथाहि । यदन्विततया ज्ञात एवेतरान्वयधीस्तत्तत्र विशेषणम् । इदन्तान्विततया ज्ञात एव पिण्डे तत्तान्वयधीः, तत्तान्विततया ज्ञात एवेदन्तान्वयधीः । सोऽयमित्येकस्मिन् पिण्डे भवतीति तत्तादिकं विशेषणम् । अत एव धीकाले विद्यमानस्याऽपि धर्मान्तरमुत्थाप्य व्यावर्तकस्य काकवद् गृहमित्यत्र काकस्य न विशेषणत्वम् । दण्ड्ययमासीदित्यत्र दण्डस्य विशेषणत्वं काकोत्थापिते तृणत्वान्विततया च ज्ञाते गृहे देवदत्तीयत्वान्वयधीर्न तु काकान्विततया ।

किञ्च सोऽयमिति प्रत्यभिज्ञा नाऽखण्डार्थविषया । तत्र प्रत्यक्षे शब्दवृत्तेर्लक्षणाया अभावात् । तत्तेदन्तोल्लेखित्वेन तत्र निःप्रकारकत्वस्याऽनुभवपराहतत्वात् । तदनुल्लेखे त्वभिज्ञातो वैलक्षण्यानुपपत्तेः । शाब्दप्रत्यभिज्ञाऽपि नाऽखण्डार्था । स्वप्रत्यभिज्ञातस्यैव परं प्रतिबोधनात् ।

न च प्रत्यक्षस्य लक्षणानपेक्षत्वेऽपि बाधादेव स्वरूपमात्रविषयकत्वमिति वाच्यम् । विद्यमानतयेदन्ताया अतीततया तत्ताया अवगाहिनः प्रत्यक्षस्य विरोधलेशाभावात् ।

किञ्च स्वप्रकाशस्वस्वरूपभिन्नाभेदस्य नित्यसिद्धत्वेनोपदेशवैयर्थ्यात् । तदस्फुरणे बुभुत्सानुपपत्तेः । भ्रमकालज्ञानाधिकाप्रतीतेर्महावाक्यात् भेदभ्रमनिवृत्त्यनापत्तेः ।

न च तदादिपदद्वयजन्यसार्वज्ञ्याद्युपलक्षितस्वरूपज्ञानमज्ञान-

Digitization by Arya Samaj Charitable Foundation, Chennai

निवर्तकमिति वाच्यम् । स्वरूपभिन्नसार्वज्ञ्यादेरुपलक्षणतया भाने श्रुतेरखण्डार्थकत्वहानेः । अभाने भ्रमनिवर्तकत्वासम्भवात् ।

यत्त्वाश्रमेणोक्तम् । सो ऽयमिति पदद्वयं तत्तेदन्ते एकवृत्ती इति बोधयति उत सोयमित्येवप्रतीत्याकारवाक्यतात्पर्यमेकवृत्तित्वे इति । ना ऽऽद्यः । तयोः पदार्थोपसर्जनतयोपस्थितत्वात् । ना ऽन्त्यः एकत्वरूपाभेदस्य वाक्यादन्येनानुपस्थितेर्वाक्यादेव तत्सिद्धौ वाक्यमखण्डार्थकमेवेति । तन्मन्दम् । पक्षद्वये ऽपि दोषाभावात् । प्रथमे पिण्डमात्रस्य प्रत्यक्षत्वेन तत्तादिवैशिष्ट्यस्यैवबोधनात् । द्वितीये तयोः पदार्थोपसर्जनतयोपस्थितयोरप्येकार्थवृत्तित्वेनोपस्थित्यभावात् ।

यत्तु तत्त्वमसीति वाक्यस्य सत्यादिवाक्यात् तत्पदाच्च प्रमेयावैलक्षण्ये ऽपि धर्मिद्वयपरामर्शित्वेन भ्रमनिवर्तकत्वात् प्रामाण्यमिति तत्तुच्छम् । प्रमेयावैलक्षण्ये अज्ञातज्ञापकत्वरूपप्रामाण्यासम्भवात् । धर्मद्वयावगाहित्वे प्रमेयावैलक्षण्यस्य श्रुतेरखण्डार्थकत्वस्य चासिद्ध्यापत्तेः ।

किञ्च श्रुत्या प्रत्यक्षसिद्धजीवमनूद्य ब्रह्मत्वं बोध्यं श्रुतिसिद्धं ब्रह्मानूद्य तस्य जीवत्वं वा उभयानुवादेनाभेदो वा ऽभिधेयः । उपजीव्यप्रत्यक्षादिविरोधात् पक्षत्रयस्या ऽप्यसम्भवात् ।

न च प्रयियोग्यर्पकतयोपजीव्यमिदं रूप्यमिति नेदं रूप्यमित्यस्य बाधकं स्यादिति वाच्यम् । यत्प्रामाण्यं यत्प्रामाण्याधीनं तद्धि तस्योपजीव्यम् । नहि नेदं रूप्यमित्यस्य प्रामाण्यमिदं रूप्यमिति प्रायाण्याधीनम् । ब्रह्मादिरूपधर्मिज्ञानप्रामाण्याधीनम् ऐक्यधीप्रामाण्यमिति भवति तदुपजीव्यम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु सार्वज्ञ्यादिविशिष्टं न तद्धर्मि । किन्तु ब्रह्मस्वरूपमात्रं विशिष्टधर्मिज्ञानप्रामाण्यमैक्यज्ञानप्रामाण्येनापेक्ष्यते । किन्तु स्वरूपज्ञानप्रामाण्यमात्रम् । अन्यथेदं रजतमिति अस्या ऽपि धर्मिज्ञानत्वेनोपजीव्यतया निषेधज्ञानप्रामाण्येरूप्यत्वविशिष्टेदंज्ञानप्रामाण्यमुपजीव्यं स्यादिति चेन्न । इदन्त्वविशिष्टस्यैव धर्मित्वेन रजतत्ववैशिष्ट्यस्य धर्मित्वाप्रयोजकत्वात् ।

किञ्चासाधारणसार्वज्ञ्यादिधर्मावच्छेदेन ब्रह्मणो ऽनुद्देश्यत्वे साधारणधर्मेण स्वरूपेण वा उद्देश्यता वाच्या । तत्रा ऽऽद्ये इष्टापत्तिः । चित्त्वादिसाधारणधर्मेणैक्यस्या ऽस्माभिरप्यङ्गीकारात् । द्वितीये जीवस्य ब्रह्मैक्यासिद्धिः । असाधारणब्रह्मस्वरूपोद्देशस्य असाधारणधर्मं विना ऽसंभवात् ।

न च सार्वज्ञ्यादिविशिष्टस्योद्देश्यत्वे ऽपि नोपजीव्यविरोधो विशिष्टयोरैक्यानङ्गीकारात् तत्त्वंपदलक्षितयोरैक्याङ्गीकाराच्चेति वाच्यम् । उद्देश्यतावच्छेदकसार्वज्ञ्याद्यवच्छेदेन विधेयस्या ऽभेदस्या ऽसिद्धौ वाक्यवैयर्थ्यापत्तेः ।

न च चित्त्वेनैक्यस्येष्टत्वे ऽपि तदाश्रयैक्यं न त्वदिष्टम् । आश्रयाणां सर्वज्ञत्वासर्वज्ञत्वतत्तद्व्यक्तित्वादिना भेदे ऽपि चित्त्वेना ऽभेदेन वाक्यस्योपपत्त्या आश्रयाणां तद्व्यक्तित्वादिना ऽभेदाबोधकत्वात् । नहि प्रमेयाभिन्नं प्रमेयमभिधेयं चेत्यत्र सकलव्यक्त्यभेदः प्रतीयते । ऐक्ये प्रमाणभङ्गः ।। तत्त्वमसीत्यत्र पदद्वये प्रातिपदिकलक्षणापेक्षयापदैकदेशविभक्तौ लक्षणा लघीयसी । अस्तु वा तच्छब्दात् परत्र तृतीयादिविभक्तेः सुपां सुलुगित्यादिना प्रथमैकव-

Digitization by Arya Samaj Charitable Foundation, Chennai

चनादेशो वा । लुग्वा । तथा च तेन त्वं तिष्ठसीति वा । ततः संजात इति वा । तस्य त्वमिति वा । तस्मिंस्त्वमिति वा अर्थः । अनेन जीवेनात्मना ऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति । सन्मूलाः सोम्येमाः सर्वाः प्रजाः ऐतदात्म्यमिदं सर्वं सदायतनाः । सत्प्रतिष्ठा इति वाक्यशेषात् ।

न च सर्वज्ञत्वादिविशेषणस्य त्यागे ऽपि विशेष्यांशस्या ऽत्यागात् जहदजहल्लक्षणा जहत्स्वार्थविभक्तिलक्षणापेक्षया ज्यायसीति वाच्यम् । जहदजहल्लक्षणायां हि वाच्यान्तर्गतत्वेन प्राग्धीस्थस्य बाधकात् त्यक्तस्य पुनः स्वीकारः । जहल्लक्षणायामधीस्थस्या ऽत्यक्तस्यैव स्वीका:र ।

किञ्च शाक्तबोधाविषयीकृतस्याऽभेदादेर्लाक्षणिकबोधे भानाङ्गीकारे श्रुतेः सखण्डार्थकत्वापत्तेः । तदनङ्गीकारे लक्षणावैयर्थ्यात् ।

यत्तु तत्त्वमसीत्यादौ लक्षणां विनैव वाक्यस्या ऽखण्डव्यक्तिबोधकत्वं युक्तम् । विशिष्टबोधकशब्दस्य विशेषणबाधे विशेष्यमात्रपर्यवसानस्य लक्षणां विनैव व्युत्पन्नत्वादिति तत्तुच्छम् । प्रकृते विशेषणबाधकस्या ऽलीकत्वात् । सर्वज्ञत्वाद्यनन्तगुणविशिष्टवाचकतत्पदादेर्विशेषणांशवाचकत्वे बाधकं हि भेदनिषेधकं गुणनिषेधकं द्वितीयमात्रनिषेधकं वा वाक्यं स्यात् । नैतद्युक्तम् । तेषामभेदादिविशिष्टमिथ्यार्थपरत्वे ऽप्रमाणत्वात् । लक्षणया खण्डव्यक्तिपरत्वे ऽबाधकत्वात् । नहि विशेष्यमात्रबोधकं विशिष्टबोधकं विरुणद्धि । अखण्डपरत्वे वैयर्थ्यस्या ऽसकृदावेदितत्वाच्च ।

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्च तत्त्वंपदाभ्यामखण्डव्यक्तिद्वयबोधे ऽपि तदभेदासिध्या त्वदिष्टासिद्धेः ।

न च समानाधिकरणपदाभ्यामभेदसिद्धिः । एकधर्मिनिष्ठानेकप्रकाराबोधने पदानां सामानाधिकरण्यायोगात् ।

यद्वा । शब्दो नित्यः शब्दत्वात् घटवदित्यत्र यथा दृष्टान्तानुसाराद् अनित्य इति पदच्छेदः तथा भेदबोधकनवदृष्टान्तानुसाराद् अतत्त्वमसीति पदच्छेदः । निर्मुक्तत्वपूर्णज्ञानानन्दत्वादिना नञा सादृश्यबोधनात् ।

तथाहि । यथा परिभ्रमणेन श्रान्तः सूत्रबद्धः पक्षी शङ्कुमेवाश्रयति तथा जागरादौ परिभ्रमणेन श्रान्तो जीवः सुषुप्तौ परेशं संश्रयतीत्याह । यथा शकुनिः सूत्रेण प्रबद्ध इत्यादिना । ननु मत्तोऽन्यश्चेतनश्चेन्मया ज्ञायेत । तत्रा ऽऽह । यथा मधुकरैः गृहीता रसा अयमाम्रस्या ऽहं पनसस्येतिस्वं भेदं न जानन्ति । तथा जीवे विद्यमानोऽप्यविवेकिभिर्न स्वभिन्नतया ज्ञायते परेश इति यथा सोम्य मधुकृत इत्यादिना ।

ननु रसैरचेतनैर्विद्यमानो भेदो मा ज्ञायि मया चेतनेन कुतो न ज्ञायते तत्रा ऽऽह । यथा चेतनाभिरपि नदीभिः समुद्रे मिलिताभिरियं गङ्गा अहं यमुनेति स्वभेदो न ज्ञायते तथा त्वयि स्थित ईशस्त्वया न ज्ञायत इति इमाः सौम्येत्यादिना ।

नन्वस्तु किन्तु स्वरूपज्ञानप्रामाण्यमात्रम् । अन्यथा इदं रजतमित्यस्या ऽपि धर्मिज्ञानत्वेनोपजीव्यतया निषेधज्ञानप्रामाण्ये रूप्यत्वविशिष्टेदंज्ञानप्रामाण्यमुपजीव्यं स्यादिति चेन्न । इदंत्वविशिष्टस्यैव धर्मत्वेन रजतत्ववैशिष्ट्यस्य धर्मत्वाप्रयोजकत्वात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्चा ऽसाधारणासार्वज्ञ्यादिधर्मावच्छेदेन ब्रह्मणो ऽनुद्देश्यत्वे साधारणधर्मेण स्वरूपेण वा उद्देश्यता वाच्या । तत्रा ऽऽद्ये इष्टापत्तिः । चित्त्वादिसाधारणधर्मेणैक्यस्या ऽस्माभिरप्यङ्गीकारात् । द्वितीये जीवस्य ब्रह्मैक्यासिद्धिः । असाधारणब्रह्मस्वरूपोद्देशस्या ऽसाधारणधर्मं विना ऽसंभवात् ।

न च सार्वज्ञ्याविशिष्टस्योद्देश्यत्वे ऽपि नोपजीव्यविरोधो विशिशिष्टयोरैक्यानङ्गीकारात् । तत्त्वंपदलक्षितयोरैक्याङ्गीकाराच्चेति वाच्यम् । उद्देश्यतावच्छेदकसार्वज्ञ्याद्यवच्छेदेन भेदस्या ऽसिद्धौ वाक्यवैयर्थ्यापत्तेः ।

न च चित्त्वेनैक्यस्येष्टत्वे ऽपि तदाश्रयैक्यं न त्वदिष्टम् । आश्रयाणां सर्वज्ञत्वासर्वज्ञत्वतत्तद्व्यक्तित्वादिना भेदे ऽपि चित्त्वेनाऽभेदेन वाक्यस्योपपत्त्या आश्रयाणां तद्व्यक्तित्वादिना ऽभेदाबोधकत्वात् । नहि प्रमेयाभिन्नं प्रमेयमभिधेयं वेति अत्र सकलव्यक्त्यभेदः प्रतीयते प्रमीयते वेति भेदसिद्धिरिति दिक् ॥

इति श्रीतर्कवागीशभट्टवेणदत्ताचार्यविरचिता
भेदजयश्रीः समाप्ता ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvālī Bhāskara, (किरणावलीभास्कर) [वैशेषिक], a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra.
Ed. with Introduction and Index by Gopinath Kaviraj, M.A. Rs. 1-12

No. 2—The Advaita Chintāmaṇi, (अद्वैतचिन्तामणि) [वेदान्त], by Rangoji Bhaṭṭa,
Ed. with Introduction etc. by Nārâyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-12

No. 3—The Vedānta Kalpalatikā, (वेदान्तकल्पलतिका) [वेदान्त], by Madhusūdana Sarasvatī.
Edited with Introduction etc. by Rāmājñā Pāṇḍeya Vyākaraṇāchārya. Rs. 1-12

No. 4—The Kusumāñjali Bodhanī, (कुसुमाञ्जलिबोधिनी) [न्याय], a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja.
Ed. with Introduction etc. by Gopinath Kaviraj, M.A, Rs. 2-0

No. 5—The Rasasāra (रससार) [वैशेषिक], a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1-2

No. 6—(Part I)-The Bhāvanā Viveka (भावनाविवेक) [मीमांसा], by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka.
Ed. with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-12

No. 6-(Part II)—Ditto Ditto Rs. 0-12

No. 7-(Part I)-The Yoginīhṛdaya dīpikā, (योगिनीहृदयदीपिका) [तन्त्र], by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1-8

No. 7—(Part II) Ditto Ditto Rs. 1-4

No. 8—The Kāvyaḍākinī (काव्यडाकिनी) [काव्यशास्त्र], by Gaṅgānanda Kavīndra.

Digitization by Arya Samaj Charitable Foundation, Chennai

Ed. with Introduction etc. by Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-10

No. 9—(Part I)-The Bhakti Chandrikā (भक्तिचन्द्रिका) [भक्ति], a Commentary on S'āṇḍilyas Bhaktisūtras, by Nārāyaṇa Tīrtha.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 0-15

No. 10-(Part I)-The Siddhāntaratna, (सिद्धान्तरत्न) [गौडीयवैष्णवदर्शन], by Baladeva Vidyābhūṣaṇa.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 1-2

No. 10-(Part II)—Do. Do. Rs. 2-12

No. 11-The S'rī Vidyā Ratna Sūtras, (श्रीविद्यारत्नसूत्र) [तन्त्र], by Gauḍapāda, with a Commentary by S'aṅkarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa S'āstrī Khiste, Sāhityāchārya. Rs. 0-9

No. 12-The Rasapradīpa, (रसप्रदीप) [अलङ्कार], by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-2

No. 13-The Siddhasiddhānta Saṅgraha, (सिद्धसिद्धान्तसंग्रह) [नाथमार्ग], by Balabhadra.
Ed, with Introduction by Gopinath Kaviraj, M. A. Rs. 0-14

No. 14-The Triveṇikā, (त्रिवेणिका) [अलङ्कार], by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-14

No. 15-(Part I)-The Tripurārahasya. (Jñāna Khaṇḍa) (त्रिपुरारहस्य, ज्ञानखण्ड) [तान्त्रिकदर्शन],
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A Rs. 0-14

No. 15-(Part-II)—Do. Do. Rs. 2-4

No. 15-(Part III)—Do. Do. Rs. 2-0

No. 15-(Part IV)—Do. with Introduction, etc. by Gopinath Kaviraj, M. A.

No. 16-The Kāvya Vilāsa, (काव्यविलास) [अलङ्कार], by Chirañjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 1-2

Digitization by Arya Samaj Charitable Foundation, Chennai

No. 17–The Nyāya Kalikā, (न्यायकलिका) [न्याय], by Bhaṭṭa Jayanta.
Ed. with Introduction by M. M. Gaṅgānātha Jhā, M. A. D. Litt. Rs 0–14

No. 18–(Part I)–The Gorakṣa Siddhānta Saṅgraha. (गोरक्षसिद्धान्तसंग्रह) [नाथमार्ग],
Ed. with a Prefatory Note by Gopinath Kaviraj, M. A., Rs. 0–14

No. 19–(Part. I)–The Prākṛita Prakāśa (प्राकृतप्रकाश) [प्राकृतव्याकरण],
by Vararuchi with the Prākṛita Sañjīvanī by Vasantarāja and the Subodhinī by Sadānanda.
Ed. with Prefatory note etc. by Batuk Nath S'armā, M. A. and Baladeva Upādhyāya, M. A. Rs 2–4

No. 19–(Part.II) Ditto Ditto Rs. 2–12

No 19—(Part. III) Introduction etc. (In Preparation.)

No. 20–The Mānsatattvaviveka (मांसतत्त्वविवेक) [धर्मशास्त्र], by Viśvanātha Nyāyapañchānana Bhaṭṭāchārya.
Edited with Introduction etc. by Pandit Jagannātha S'āstri Hoshing Sāhityopādhyāya, with a Foreword by Pandit Gopi Nath Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs. 0–12

No. 21–(Part I) The Nyāya Siddhānta Mālā (न्यायसिद्धान्तमाला) [न्याय], by Jayarāma Nyāya Pañchānana Bhaṭṭāchārya.
Edited with Introduction etc. by Dr. Mangal Deva S'āstrī, M. A., D. Phil. (Oxon), Librarian, Govt. Sanskrit Library, Sarasvati Bhavana, Benares. Rs. 1–4

No. 21–(Part–II) Ditto Ditto Rs. 2–0

No. 22–The Dharmānubandhi S'lokachaturdaśī (धर्मानुबन्धिश्लोकचतुर्दशी) [धर्मशास्त्र], by S'ri S'eṣa Kṛṣṇa with a Commentary by Rāma Pandit.
Edited with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya, Assistant Librarian, Government Sanskrit Library, Saraswati Bhavana, Benares. Rs. 1–0

No. 23–The Navarātrapradīpa (नवरात्रप्रदीप) [धर्मशास्त्र], by Nanda Pandit Dharmādhikārī.
Ed. with Introduction etc. by Vaijanātha S'āstrī Varakale, Dharmaśāstra–S'āstrī, Sādholāl Research Scholar, Sanskrit

Digitization by Arya Samaj Charitable Foundation, Chennai

No. 39–The Rāma Vijaya Mahākāvya, (रामविजयमहाकाव्य) [काव्य], by Rupanātha.
Edited by Pt. Ganapatilal Jha, M. A. Rs. 2–0

No. 40–(Part I) The Kālatattva Vivechana (कालतत्त्वविवेचन) [धर्मशास्त्र], by Raghunātha Bhaṭṭa.
Edited with a Foreword by Gopinātha Kaviraja M.A. by Nanda Kishore S'arma Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 4–0

No, 40 (Part II) Do Do

No. 41–(Part I) The Siddhānta Sārvabhauma (सिद्धान्तसार्वभौम) [ज्योतिष], by S'rī Munīśvara.
Edited with Introduction etc. by Jyautiṣâchārya Pandit Murlidhara Ṭhakkura, late Sadholal Scholar, Sanskrit College, Benares. Rs 3–0

No. 42–The Bheda Siddhi (भेदसिद्धि) [न्याय], by Vis'vanātha Pañchânana Bhaṭṭāchārya.
Edited with notes etc., by Nyāya Vyākaranāchārya Pandit Sûrya Nārāyaṇa S'ukla, Professor, Govt. Sanskrit College Benares.

No. 43–(Part I) The Smārtollāsa (स्मार्तोल्लास) [कर्मकाण्ड], by S'iva Prasāda.
Edited with Introduction, notes, etc, by Vedāchārya Pandit Bhagavat Prasad Miśra, Professor, Govt. Sanskrit College, Benares.

No. 44–(Part I) S'ūdrāchāra S'iromaṇi (शूद्राचारशिरोमणि) [धर्मशास्त्र],
Edited by Sāhityāchārya Pandit Narayan S'astri Khiste.

No. 45–(Part I) Kiraṇāvalī Prakāśa (Guṇa) (किरणावली प्रकाश-गुण) [वैशेषिक], by Vardhamāna.
Edited with a Foreword by Pt. Gopinath Kaviraj, M., A., by Pandit Badrinath S'astri, M. A., Lucknow University.

No. 46–(Part I) Kāvya prakāśa dīpikā (काव्यप्रकाशदीपिका) [अलङ्कार], by S'rī Chaṇḍī Dāsa.
Edited by S'rī S'ivaprasāda Bhaṭṭāchārya, M. A., Professor, Presidency College, Calcutta.

No. 47–Bhedajayaśrī (भेदजयश्री) [माध्ववेदान्त], by S'rī Tarkavāgīśa Bhaṭṭa Veṇīdattāchārya.
Edited with Introduction etc, by Pandit Tribhuvan prasad Upādhyāya, M. A., Inspector of Sanskrit Pāṭhashalas, United Provinces, Benares.

Digitization by Arya Samaj Charitable Foundation, Chennai

THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES

(SANSKRIT)

SARASVATALOKA

Edited by

GOPINATH KAVIRAJ, M. A.

Kirana 1 (In progress)

(a) Mangalam, etc, by Nārāyaṇa S'āstri Khiste.

(b) Mimansaka mata saṃgraha, by Haranchndra Bhaṭṭācharya.

(c) S'rimad Ācharya Mandana Mis'ra by Chinna Swami S'astri

(d) Bhagavato Buddhasya Charitam Upades'as'cha : by Gopinatha Kaviraj.

Kirana I (Supplement)

Sanskrita Kavi Parichaya-(Bharavi) by Nanda Kishore Sharma.

Kirana II (In progress)

(a) S'āradā Prasādanam by Nārâyana S'āstri Khiste.

(b) Chūḍāmaṇi Dars'anam by S'as'adhara Tarkachūḍāmaṇi.

To be had of

The Superintendent

Government Press, U. P.,

Allahabad.

Bharatiya Vidya Bhavan's Sri Sankaracharya Sanskrit Mahavidyalaya
217

Digitization by Arya Samaj Charitable Foundation, Chennai

Bhavan's Sri Sankarach

Digitization by Arya Samaj Charitable Foundation, Chennai

DATE DUE

Class No. __________ Book No. __________

Accession No. 1183

...is book should be returned to th...
...on the date last stamped. A fine o...
...will be charged for each day the boo...
...r time.

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya

217

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai